भवानन्द्यां इतिप्रामाण्यवादः

क्र नं० १५०७ — घ

म·टी·अ· ॥श्रीरामचंद्राय नमः॥श्रीगणेशाय नमः॥गिरमित्यादि॥अत्रश्लोकाप्रत्ययद्वयेनतादृशानिधानविधानानं
१ तर्यलाभात्स्वीयदीधितिवृत्तिनिर्माणकालेतदसत्वस्यसूचनेनगुरुवचनेनसिद्धांतानुरोधेनगुरुवचन
मनुसृत्यइदंनिर्मितमितिस्वीयग्रंथस्यप्रकर्षोतिशयःसूचितः।फलवदिति।फलवच्छास्त्रस्यान्वीक्षि
कीरूपस्योपकरणत्वेनांतर्गतत्वेनतदेकदेशार्थविवेचकत्वेनेतियावत् आन्वीक्षिकीरूपफलेनैवस्वी
यग्रंथस्यफलवत्वमितिभावः॥फलवच्छास्त्रोपकरणत्वेनेतिप्रयोजनवत्तामित्यत्रहेतुःनत्वभिधेयसंबं
न धयोःअतएवतयोःपृथक्समासेनिर्देशः।प्रयोजनेति।प्रयोजनमपवर्गः।अभिधेयंप्रमाणतत्वं·संबंधः
।शास्त्रप्रमाणतत्वयोःज्ञाप्यज्ञापकभावः।स्वीयग्रंथस्यचिंतामणिरूपस्य।जगत्शब्दस्यवस्तुमात्रशक्त
तयातस्यदुःखपंकमग्नत्वासंभवात्अचेतनघटाद्युद्दिधीर्षायोमूलेभ्रांतत्वापत्तेश्चाह।जगदिति।जगत्पद
स्यसंसारीतमज्ञातयरतायामेवकारस्तात्पर्यग्राहकः।जगत्पदंसंसारीतत्परं।एवकारपदंसमूहपरंतस्यया
वत्वप्राप्तेपिजगज्जगदेवेत्यतपरमितिकेचित्तदसारमुक्तात्मनामुद्देश्यत्वाभावादाह।संसारीपेति।संसारोमि
थ्याज्ञानवासनाऽवच्छेदकतासंबंधेनतद्विशिष्टशरीरंसंसारितस्यचमुक्तिरूपोद्धरणसंभवादाक्षेतिस राम०
मवायसंबंधेनतस्याग्रकं।नन्वनधिकार्युद्दिधीर्षयाशास्त्रप्रणयनेनमुनिःप्रत्यवेयादतआहानचेति॥ १

रूच्चारणप्रयुक्तोच्चारण ऽमध्यपनं।तदध्यापनं च तदुच्चारणे ऽध्ययोच्चारणं तज्ज्ञानेच्छया तच्छरीरावच्छिन्नज्ञानेच्छया
वा॥लिप्यादिप्रणयनं तु गौणं तदध्यापनं।न च शूद्रशरीरोच्चारणे तच्छरीरावच्छिन्नज्ञानेच्छया वा लिप्यादिप्रणा ष्पा
पनं मुनेर्येन सशूद्राध्यापको भवेदिति भावः।प्रत्यवयंतीति।प्रमाणाभावादिति भावः नन्वनधिकार्युद्धार
स्यशास्त्रादभावे मुनेः कथं तत्रेच्छेत्यत आह उद्देश्यते ति अत्र संभवं तदुद्देश्यतानं कामपि क्षतिमावहतीति भा
वः विशिष्टेति ब्राह्मणत्वादिविशिष्टेत्यर्थः अयं भावः यथा कीटघातमनांकीटशरीरावच्छेदेनोच्चारणास्या
संभवादनुद्देश्यत्वेपि ब्राह्मणशरीरावच्छेदेनोच्चारणमुद्देश्यं तथा शूद्रात्मनामपि इति न मुनेः शूद्राध्याप
कत्वं इत्युक्तक्रमेण मुनेः शूद्राध्यापकत्वाभावान्न प्रत्यवायित्वं तदभ्युपगमेनावटीकाकृतां विरुद्ध इति।
अस्वरसमाविष्करोति टीकाकृतस्त्विति अन्यथैवेति।तयः प्रभावादेव प्रत्यवायपनाधाइ इति क्रमेणेत्यर्थः
ननु प्रमाकरणत्वस्यैव तत्त्वावधारणं विशेषणीभूतप्रमातत्त्वावधारणं विनाऽशक्यमिति पूर्वपक्षिणो
ऽभिमतं तत्र च प्रवृत्तिजनकत्वाभावेन तत्प्रामाण्यनिश्चयस्यानपेक्षणीयत्वाभिधानमयेत्यादिग्रंथस्या
नुचितमित्यत आह प्रामाण्यनिश्चापनेनेति प्रवृत्तिजनकीभूतनिःश्रेयससाधनताज्ञानप्रामाण्यनि
श्चापनेनेत्यर्थः प्रवर्त्तयत तदुपायेमननादौ मन्वाद इतितथा च भ्रांताशंकेति भावः।केचित्तुप्रमाण

भ॰टी॰प्र तत्त्वावधारणं शास्त्रप्रवृत्त्यधीनं शास्त्रप्रवृत्तिश्च प्रामाण्यनिश्चयसाध्या तदशक्यता प्रमाणतत्त्वावधारणस्या-
१ पि अशक्यत्वमिति एवं ग्रन्थार्थमुपवर्ण्याथेत्यादिग्रन्थमवतारयति अन्ये तु प्रमाकरणत्वरूपेण प्रमाण-
वधारणमेव प्रमातत्त्वावधारणाधीनं इति बोधकत्वरूपेण तदवधारणे कथं तदशक्यता॰ न च प्रवृत्त्यर्थं
2 तदपेक्षावश्यकीत्यत आह अथेतीति व्याचक्षते प्रमाणतत्त्वावधारणं द्विप्रमाणमेवेति निश्चयः स च प्र-
माणमिति ज्ञानस्य प्रामाण्यनिश्चयाधीन इति पूर्वपक्षार्थः शास्त्रप्रमाणतत्त्वावधारणं मा जनयतु प्रमाणतत्त्व-
ज्ञानेनैवाभिमतसिद्धेः न च प्रवृत्त्यर्थं प्रमातत्त्वावधारणमपेक्ष्यमित्याशङ्कायामथेत्यादिग्रन्थावतार इत्यन्ये
प्रामाण्यनिश्चयस्यैवाशक्यतयाऽभिहितत्वादाह प्रामाण्यज्ञानेनेति यस्य संशयस्य इत्यनेन संशयेदार्थे प
एकधर्मिकविरुद्धोभयप्रकारकज्ञाने यत्संबन्धित्वं शब्दतो लभ्यते न तु व्यतिरेके ज्ञानत्वेनाविवक्षणी
यदीयत्वं तस्य संशयपदार्थैकदेशत्वात् इति संशयेऽव्यतिरेकत्वेन व्यतिरेकावगाहित्वं लभ्यते तथा न
च व्यतिरेकज्ञानत्वेन विवक्षणीयस्य प्रतिबन्धकत्वस्य शब्दतो लाभायपत्संशयव्यतिरेकयोर्निश्चय इति
भ्रमनिरासाय व्याचष्टे व्यतिरेकेति संशये प्रकारत्वस्य व्यतिरेके च प्रतियोगित्वस्य पर्यवसितार्थत्वेन पर- रामं॰
स्येत्यत्र संशयव्यतिरेकयोरेकरूपपर्यवसितार्थाभावेन व्यतिरेकपदव्यत्यासेन व्याचष्टे व्यतिरेकेतीति कश्चि १

त् तेन संशयनिश्चयसाधारणव्यतिरेकज्ञानमात्रस्य प्रतिबंधकत्वोपदर्शनेन व्यतिरेकज्ञानत्वेनेति अ
न्यथायव्यतिरेकसंशयोपयत्र प्रतिबंधक इत्येतावतैव सामंजस्ये व्यतिरेकनिश्चयपदोपादानवैयर्थ्यात्
नन्वव्यभिचारनिश्चयं प्रति अव्यभिचाराभावप्रकारकज्ञानस्य प्रतिबंधकत्वात् अव्यभिचारनिश्चयस्य
च तस्मिन्न हेतुत्वात् व्यभिचार इत्यत आह व्याप्तिसंशयस्त्विति तथा च व्यभिचारनिश्चयपराव प्रतिबंधक इति वं
नयेनेयं व्याप्तिरितिभावः नचवक्ष्यमाणसाध्यप्रवृत्तिं प्रति फलसंशयस्यापि प्रतिबंधकत्वात्तन्निश्चयस्य
तत्राहेतुत्वाद्व्यभिचार इति वाच्यं तत्राप्यफलज्ञाने सति बलवद्द्वेषादेव न प्रवृत्तिः फलनिश्चयो वा प्रवृ
त्तिजनक इति मते नास्याभिधानादिति अत्राप्यप्रामाण्यज्ञानानास्कंदितत्वेन ज्ञानं विशेषणीयमित्यतो ना
संभवः उक्तव्याप्तौ विपक्षे बाधकमाह तद्व्यतिरेकेति तन्निश्चयत्वेनेति तथा च व्याप्ताव पितथैव विशे
षणीयं अन्यथाप्रामाण्यज्ञानस्य तद्व साधनतासमूहालंबनस्येश्वरीयस्य वा ज्ञानकत्वेन सिद्धसाधनापत्ते
रितिभावः ननु प्रवृत्तिघटितव्याप्त्युपादानेऽनुमितौ व्याप्तिर्विवेति दृष्टांतासिद्धिरत आह प्रवृत्तीतीति त
था च व्याप्तौ तन्न निवेश्यं इह प्रामाण्यव्यतिरेकज्ञानस्थले तथा कूसकारणसद्भावे कार्यानुत्पादः अकृ
सकारणप्रवेनिश्चयस्यैव तदानीमभावात्तथा च हेतुरेवासिद्ध इति भावः प्रामाण्यव्यतिरेकज्ञानाभाव

११ अनुमितिं प्रति व्याप्तिनिश्चयत्वेन हेतुत्वे प्रकारान्तरत्वस्यात्र घटकत्वादित्याशयः।

भ॰टी॰ सहितार्थनिश्चयस्य प्रवृत्तिहेतुत्वे ऽप्रामाण्यव्यतिरेकज्ञानाभावस्य कारणतावच्छेदकत्वरूपं प्रयोजकत्वं
२ । व्याप्तिव्यतिरेकप्रकारकभेदस्यापि कारणतावच्छेदकत्वरूपप्रयोजकत्वं । एवं व्यतिरेकज्ञानत्वेन त्वप्रज्ञा
३ नत्वं न विवक्षितं यद्वा । व्याप्तिनिश्चयसत्वेपि व्याप्तिव्यतिरेकज्ञानादनुमित्यनुदयात् व्याप्तिव्यतिरेका
ज्ञानत्वेनैव ~~अज्ञानत्वं न विवक्षितं यद्वा व्याप्तिनिश्चयसत्वेपि व्याप्तिव्यतिरे~~ न स्वातंत्र्येण प्रतिबंध
कत्वं· तथा च पक्षे कार्यप्रयोजकीभूताभावप्रतियोगित्वरूपप्रतिबंधकत्वं हेतौ निवेशनीयं प्रयोजक
त्वं च कारणतावच्छेदकसाधारणमित्यभिप्रेत्याशंकते नचेति केचित्तु प्रयोजकत्वं नियतएवंवर्त्तित्वं·
प्रामाण्यव्यतिरेकज्ञानाभावं व्याप्तिव्यतिरेकज्ञानाभावश्च प्रवृत्त्यावनुमितौ च नियत एवं वर्त्तीत्याशयः
यद्वा प्रामाण्यसंशयः प्रवृत्तिजनकीभूतार्थनिश्चयप्रतिबंधकार्थसंशयसामग्रीविधया व्याप्तिसं
शयश्चानुमितिकारणीभूतव्याप्तिनिश्चयप्रतिबंधकव्याप्यवत्वसंशयसामग्रीविधया कार्यानुत्प
त्तिप्रयोजक इति तयोरभावस्य कार्योत्पादे ऽवश्यं प्रयोजकतया पक्षे तादृशप्रयोजकीभूताभावप्रतियोगित्व
नवेति· मेव हेतौ निवेश्यमतो नासिद्धिरित्याशंक्य निषेधति नन्विति ननु प्रामाण्यव्यतिरेकज्ञानकालेप्यर्थनिश्चय एम॰
सत्वात्तदानीं प्रवृत्त्यनुत्पादात्तस्य प्रतिबंधकत्वं दुर्वारं । न चाप्रामाण्यज्ञानानास्कंदितनिश्चयत्वेन हेतु २

+त्वो चित्यात् तथा च व्याप्तिबलात् प्रामाण्यनिश्चयस्य हेतुत्वमिति [redacted]
+त्वेतदभावः कारणतावच्छेदको न तु कारणमिति वाच्यं तज्ज्ञानीयप्रामाण्यज्ञानाभावस्यापि विनिगमना
विरहेण हेतुत्वा + न वाप्रयोजकत्वं व्यतिरेकज्ञानस्य प्रतिबंधकत्वेऽप्रामाण्यनिश्चयानास्कंदितविशे त्वं
षणे निश्चयस्य हेतुत्वेऽप्रामाण्यज्ञानानास्कंदितत्वमिति लाघवस्यैवाप्रयोजकत्वमत आह यत्तदर्थे
योरिति तथा चानुमितौ व्याप्तिनिश्चयस्य तत्तद्व्याप्तिबलात् हेतुत्वेऽपि प्रवृत्तौ मानाभावः ननु प्रामाण्यत
त्वनिरूपणं प्रमातत्वरूपविशेषणनिश्चयं विनाऽशक्यमिति समाधिसत्त्वे प्रवृत्तौ प्रामाण्यनिश्चयस्या
वश्यापेक्षणीयत्वरूपसमाधानं मूले किमिति समाहितमित्यत आह अभ्युपेत्येति प्रामाण्यनिश्चा
यनेन निश्चयस्यार्थं प्रवृत्तिद्वारा शास्त्रस्य निश्चयसंबंधित्वमभिप्रेत्येत्यर्थः तथा च प्रामाण्यनिश्चय
रूपद्वारासंभवात् कथं शास्त्रस्य निश्चयस्वरूपफलसंबंधित्वमिति मूलोपायक्षेपार्थः स्वतः स्वस्मादि
ति तथा च तन्निरूपणं तद्विषयकव्यवहारः व्यवहारश्च शब्दप्रयोगादिः तथा च स्वस्मात् स्वानुव्यव-
सायादितो वा प्रामाण्यविषयकः व्यवहार इति मूलार्थः तस्य तादृशव्यवहारजनकत्वं च न प्रामाण्यवि
षयतां विनेत्यर्थात् प्रामाण्यविषयत्वस्य लाभः भट्टमिश्रौ प्रत्याह स्वकीयादिति सामान्यशब्दस्य यथा

म॰टी॰ ४ मतमर्थभेदं दर्शयति तैरनुव्यवसायेनेत्यादिनां तत्रेत्यस्य व्याख्या मतत्रयेति संशयजननीति संश
यजननीः संशयप्रयोजिकाः प्राचीनमते शाब्दबोधानंतरं मानससंशयात् स्वमते शाब्दात्मके संशय
५ स्वीकारे यथाश्रुतमेव साधु तात्पर्यवशादिति तेन विशेष्यत्वप्रकारकत्वादि दिप्रकर्षनि
रासः भावत्वपुरस्कारेति तस्य प्रयोगमात्रे साधुत्वार्थकत्वेन तत्र धात्वर्थमात्रस्यैव लाभादिति भावः तद्भिन्नेति
नेति अन्यथा तादृशज्ञानत्वकारणयोरैवलाभादिति भावः इदं च भावकारणत्वपुरस्कारेण विशेषणं। तादृशज्ञा
नकारणत्वस्यापि लिंगज्ञानादिवृत्तित्वात् कथं ज्ञानपदेन तन्निरास इत्यत आह स्वावधारणमिति ज्ञा
नस्यैव यत्प्रामाण्यं इत्यर्थः तन्नूतादृशज्ञानकारणत्वं च प्रामाण्यपदेन तादृशज्ञानकारणत्वेनोप
स्थापनात् तेन रूपेण ज्ञानत्वनैयत्यं तत्प्रमाकारणत्वस्येति भावः तेन तादृशानुमितिकारणत्वादेर्ज्ञा
नत्वनैयत्येऽपि न क्षतिः ननु ज्ञाप्यतेऽनेनेति व्युत्पत्त्या ज्ञानकरणमपि ज्ञानपदेनाभिधीयते तथा च ता
दृशप्रामाण्यमपि ज्ञानकारणत्वव्याप्यं भवत्येवेत्यत आह ज्ञानपदेनेति लक्षणेवं ज्ञानवृत्तित्व इति तत्प्र
(ज्ञान) कारकं वेत्तुः फलितार्थः तथा च ज्ञानवृत्तित्वनिष्प्रयोजनमत आह तद्वतीति तथा च तादृशप्रामाण्य रम॰
स्य लाभायैव वा तात्पर्यमाह कं ज्ञानपदमिति भावः निष्कंपप्रवृत्त्युपयोगिप्रामाण्यमभिधायैव विचार ४

रंमात्रप्रमाकरणत्वाभावेक गात्वेपक्षत्वमप्रसक्तमिति स्वयं ज्ञानपदप्रयोजनमाह तद्वतीत्यादिना यद्य
१ पि ज्ञानत्ववति ज्ञानत्वप्रकारकत्वरूपप्रामाण्यं पावे ज्ञानग्राहकग्राह्यं संभवत्येव तथापि घटमहं जानामीत्या
कारकमेवतेषां सर्वं ज्ञानं जानीतो तत्र घटत्ववति घटत्वप्रकारकज्ञानं विषयः न तु ज्ञानत्ववति ज्ञानत्वप्रकार
कत्वाद्यपि तथा सति ज्ञानं जानामीत्याकारा यत्तौ विषयानवच्छापात्तादिति यथोक्तं तत्तानेति तथाच तत
घटज्ञानप्रामाण्यं यावद्घटज्ञानग्राह्यं न चेत्यर्थः स्यात ज्ञानप्रामाण्यं तज्ज्ञानग्राहकग्राह्यं न चेत्स्यच्चलाभापेत्य
र्थः मिश्रादिमतइत्यादिना भट्टमतपरिग्रहः गुरुमते स्वप्रकाशज्ञानपांगृहीतप्रामाण्यकज्ञानस्यासंभवा
पि दिति यादृशनियमतो यदीयग्राहकसामग्र्यां पूर्वं अप्रामाण्यग्राहकावतारस्तज्ज्ञानप्रामाण्ये गुरुमतेऽपिवा
धः तथाप्येवं ज्ञानस्य प्रथममज्ञानात् पूर्वमप्रामाण्यग्राहकावताराऽसंभवात् तथोक्तं न चैव यत्र सर्वं ज्ञा
नं निष्प्रकारकमिति ज्ञानानन्तरं नियमतो यस्य विषयविशेषस्य ज्ञानं तत्प्रामाण्यं गुरुमतेऽप्यज्ञातमिति वा
~~च्यं गुरुमते ज्ञानमात्रस्यैव स्वप्रकाशीभूततत्प्रकारकतया ज्ञानं तत्प्रामाण्यं गुरुमतेऽप्यज्ञातमिति वाच्यं~~
गुरुमते ज्ञानमात्रस्यैव स्वप्रकाशीभूततत्प्रकारकतया ज्ञानग्राहकत्वेन ज्ञाने निष्प्रकारकत्वासंभवाद्गोग्र
हरूपभ्रमासंभवादिति किमेषा त्रुटी नभिधानादत्त आह ज्ञानस्येति तादृशप्रामाण्यविनेति तेनप्र

४ तथापि प्रमापदप्रवृत्तिनिमित्तत्वेन पक्षतायां तादृशप्रवृत्तिनिमित्ताप्रसिद्ध्या रूपावच्छिन्नप्रतिबन्धः ॥४

प्र. शि. मेयत्वादिना ज्ञानेऽपि न क्षतिः पक्षतावच्छेदकप्रकारेणाबाधज्ञानस्यैवानुमितिविरोधित्वे प्रमेयत्वप्र

५ कारकज्ञानस्याविरोधित्वात् तद्धारणाय विशेषणदानानौचित्यात् तत्प्रकारकज्ञाने चतस्यैव ज्ञानग्रा

हकत्वेन तद्ग्राह्यत्वरूपसाध्यस्य सत्त्वात् बाधासंभव इति भावः यद्यपि साध्याप्रसिद्धिरूपबाधेनैव दोष

5 स्तत्प्रामाण्याश्रययावद्ग्राह्यत्वं च प्रमापदप्रवृत्तिनिमित्ततावच्छेदेन बाधितं प्रामाण्यानां विशेषरू ग्राहक

पेणोपस्थितिध्रौव्ये विशिष्टस्यैव पक्षत्वमुचितं एवं तस्यापि प्रामाण्यस्य प्रमापदप्रवृत्तिनिमित्त

यमा त्वादिना ज्ञायमानत्वात् ज्ञानपदेनापि न तद्धारणं विशिष्य ज्ञायमानत्वे च सर्वसाधारणस्य प्रा

माण्यत्वात्मकस्य विशेषणस्यैक्याभावादनैकरूप्येण पक्षत्वमिति तथा चाज्ञायमानप्रामाण्याश्रयग्रा

त ह्यत्वं साध्यमेव कुतोऽप्रसिद्धं यत्तु वह्नौ कांचनमयत्वाभाववद्ग्राहकेतीदृशप्रामाण्याश्रयीयत्वाभा

पि ज्ञाने साध्यो दिशो वद्वृत्तेरप्रमाकारकेन साध्याप्रसिद्धेरपि ज्ञानं वाच्यं तच्च प्रामाण्याप्रसिद्ध्या न संभवति तथा च तत्प्रामा

णांगरबाधः ण्यज्ञाने तादृशसाध्याप्रसिद्धेरपि न ज्ञानमिति तन्न अज्ञानरूपसाध्याप्रसिद्ध्यानुक्तदोषासंभवात् व

स्तुतस्तु परार्थानुमानाभिप्रायकोऽयं ग्रन्थः तत्रैव विप्रतिपत्त्युपयोगात् तथा चाज्ञायमानप्रामाण्यपक्षे ण०

अप्रसिद्धिरूपसबाधस्योद्भावनमशक्यं पक्षस्योद्भावने ज्ञायमानस्यैव संभवात् अनुद्भावने कुत्रवाऽ ५

धोऽप्रसिद्धिर्वोऽइत्यनुयोगानिवृत्तेः इत्थंच बाधबुद्ध[illegible]भवाद्गुद्भावयितुरिति भ्रमः शेषः सिद्धसाधनस्येति
नैय्यायिकसिद्धप्रामाण्यानुमानादेरपि ज्ञानग्राहकत्वादिति बाधस्येति पक्ष[illegible]पि सर्वमभिधेयं प्रमे
यमिदं ज्ञानं प्रमेतिशाब्दबोधस्यानुमितेर्वा विषयतायाश्च केवलान्वयित्वात् तन्निषेधस्याप्रसिद्धान
बाधसंभवः सामा[illegible]न्यलक्षणायोगिज्ञानयोरभ्युपगमे तु स्वतरां तयाप्यभावसा
ध्ये प्रतियोगित्वं मत्वं बाध इत्यभिप्रायेणाह बाधस्येति साध्याभावप्रमा बाध इत्यभिप्रेत्याह अप्रसिद्धे
रिति फलत इति यावत्यदस्य फलं सिद्धसाधनाप्रसिद्ध्योरन्यतरस्य वारणं तदनुरोधादित्यर्थः शा[illegible]द्वा
तै त्वग्राहकस्यैव विशेषणत्वलाभादिति यावन्तो ग्राहकग्राह्यत्वस्याप्रसिद्ध्यापादकसामग्रीजन्यग्रहविषय
त्वरूपसाध्यमप्रसिद्धं अत एव ग्राह्यत्वेति तादृशेति तद्वप्रामाण्याग्राहकज्ञानग्राहकसामग्रीजन्यग्रहत्व
व्यापकतावच्छेदकत्वं साध्यविषयतायाः स्वरूपसंबंधविशेषेण व्यापकतालाभायविषयित्वोपादानं
व्यापकतावच्छेदकं तु निरूपितत्वसंबंधेन अप्रसिद्धिस्तु प्रामाण्यघटकीभूतघटत्वादौ घटत्ववि
षयिताया तादृशग्रहत्वव्यापकत्वस्य सर्वसम्मतत्वादिति यथाश्रुते रूपांतरेण प्रामाण्यविषयिता
त्वेन वा व्यापकत्वे न वा व्यापकत्वे सिद्धसाधनाप्रसिद्ध्योरन्यतरापत्तिः न च प्रमेयविषयितात्वेन व्यापक

कस्मिंश्चिदपि ग्रहे
पाव [illegible] सामग्री जन्य
त्वा प्रसिद्धेरिति

प्रामाण्यविषयतात्वे
न वा विषयितात्वेन
वा उपायेन व्यापकत्वे
प्रसिद्धेरंसे सिद्धसा
धनं इति भावः ८१

प्र॰ श्रि॰ श्री ताया प्रमेयत्वेनाप्रामाण्यस्यापि तादृशाव्यापकतावच्छेदकत्वात् सिद्धसाधनमिति वाच्यं तत्समानाधिक
६ रणात्यन्ताभावप्रतियोगितानवच्छेदकत्वस्य व्यापकतावच्छेदकत्वस्य तादृशावच्छेदकेकेनापिरूपेणाऽ
संभवादिति भावः न च घटत्ववति घटत्वप्रकारकत्वस्य ज्ञानव्यक्तिभेदे न भिन्नत्वे तादृशाव्यापकता
म वच्छेदकत्वं संभवत्येवेति वाच्यं तथापि ज्ञानव्यक्तिभेदेनोपादानादोषासंभवादिति आत्मादीति नै
न चात्मनोऽप्रामाण्यग्राहकत्वेनैव चारणं विवक्षणीयस्य तदर्थं तत्प्रामाण्यग्राहकत्वेन ज्ञानग्रा म
हकत्वेन भट्टमतसिद्धयत्तद्भिन्नत्वस्य तत्रसत्वात् आत्मादीत्यत्रात्तद्गुणसंचिज्ञानवक्त्रीदिणामनो
योगादिविशिष्टाणां ग्रहणमिति केचित् ज्ञानव्यक्तिभेदानां आत्मप्रामाण्याश्रयीभूततत्तद्घटज्ञा
नादिरूपाणां अन्यथा ज्ञानभेदेन प्रामाण्यभेदे घटज्ञानग्राहकसामग्रीजन्यग्रहविषयत्वस्य तत्तत्प्रा
माण्ये बाधापत्तेरिति भावः तत्र तत्तद्घटज्ञानादिरूपे घटज्ञानव्यक्तिभेदे घटत्ववति घटत्वप्रकारकत्वस्या
घटत्वादिप्रकारकघट भेदे तादृश्येण तस्यैव पक्षत्वमिति मते त्वाह ज्ञानत्वविशिष्टेति अन्यथा घटत्ववति घटत्वप्रकारक
ज्ञानत्वेन निवेशे विज्ञा मिदमिति शाब्दजन्यज्ञानस्यैदंत्वरूपेण ज्ञानग्राहकस्याविषये ज्ञानत्वे विधिप्रसिद्ध्यसंभवात् यद्यपि एम०
नत्वे प्रसिद्धिसंभवतीत्याह=3 प्रामाण्यं घटत्ववति घटत्वप्रकारकज्ञानत्वं तद्ग्राहकत्वादुक्तवाक्यस्य विवक्षणीया ग्राहकातेनैव वा ६

इदंत्वादिरूपेण ज्ञानत्वेन ग्राह्यत्वाप्रसिद्धिस्यादेः१

णादिकरणमिति। अप्रामाण्यस्य प्रमाभिन्नत्वेन ज्ञानत्वेन च तत्संग्रहाय प्रेत्ये। अप्रामाण्यस्य घटत्वादेरप्यावर्तकधर्मविधया
प्रकारत्वस्य हि विरोधित्वं विशिष्टप्रकारकत्वरूपमाह

णामन्यथा ज्ञानत्वविशिष्टग्राहकत्वविवक्षणेऽपि घटत्ववति घटत्वप्रकारको गुणो ज्ञानविषयत्वमिति श
ब्देन ज्ञानत्वविशिष्टग्राहकेण ज्ञानत्वघटितप्रामाण्याग्रहापत्तेः। तथापि स्वमते ज्ञानशब्दस्य तज्ज्ञान
मात्रलाभप्रयोजकतया ज्ञानत्वाघटितप्रामाण्यमेव पक्षः तथा चाग्राहकांतस्य तादृशप्रामाण्याग्राह
कत्वेन ज्ञानग्राहकत्वेनयद्वा इदमतसिद्धं तद्भिन्नत्वमर्थः स चोक्तवाक्येऽपि अस्तीति तत्र ज्ञानत्वाग्राहक
त्वात् तत्र विधिप्रसिद्धलाभ इतितथा च तत्र साध्यप्रसिद्धिसंपादनायैव ज्ञानत्वविशिष्टत्वादिविव
क्षितमिति भावः वस्तुतो ज्ञानत्वविशिष्टं ज्ञानत्वघटितं प्रामाण्यं तदग्राहकत्वस्य तत्प्रामाण्याग्राह
कत्वेनेत्याद्यग्राहकांतप्रतियोगिकोटौ विवक्षणादित्यर्थः। नन्वप्रामाण्यस्य भ्रमत्वरूपस्योपाद
ने निष्प्रकारकत्वादिग्राहकेणापि प्रामाण्याग्रहादिद्योवाद्योऽत आह अप्रामाण्यमिति प्रामा
ण्यविरोधि· प्रामाण्यविरोधि ज्ञानविषयः। न तु प्रामाण्यस्य साक्षात्तद्विरोध्यभिप्रायेणाह निष्प्रका
रकेति। तुष्टसप्तकमिति। एवं च तत्र ज्ञाने तद्विरोध्यमाहकत्वमुक्तसामग्र्यां वर्तत एवेति भावः। त
त्र ज्ञाने घटत्वनिष्प्रकारकत्वादीनामग्रहादिति। अन्यथा तस्य यदप्रामाण्यं तदग्राहकेति पष्ठीसमा
साश्रयणेऽसिद्ध्यापत्तेरिति ननु गुरुमते ज्ञानमात्रस्यैव प्रमात्वात्तत्र ज्ञाने प्रामाण्यविरोधिप्रकार

यदीममाहे जितदीय प्रामाण्यविरोधिपर्यवसितिने
इत्थं निष्प्रकारकत्वादिस्म दा यस्मामन्य प्रसिध्यापतेः =

विशेषितः ज्ञानं
विशेषितं

ज्ञानत्वाघटि

प्रामाण्यविशेषणीभूत
नादेयधिते घटत्वे वा
घात

एतत्पदे ज्ञानग्राहक सामग्र्याप्रमाण्यग्राहकत्वाभिप्राय अतोऽयं प्रतेनाधोबोध्यः ॥

प्र.शि.
७
7

कस्यहाप्रसिद्ध्या साध्याप्रसिद्धिस्तदर्थं चेत्यत आह अप्रामाण्यग्रहइति इदमितियद्यप्यप्रामाण्यग्रहय
दस्यैवेदमप्रमेतिव्यवहारजनकग्रहपरत्वे तदित्यस्यैव पर्य्यव॰ त थापितज्ज्ञानवृत्तिइदंत्वावच्छेदेना
प्रामाण्यग्रहजनकत्वस्य लाभायतदितिध्येयं स्यातं अयोति अन्यथाइदं ज्ञानमप्रमेतिज्ञानादपि
इदमप्रमेतिव्यवहारापत्तेरिति अप्रामाण्योपस्थितौ इच्छादिवृत्तित्यधिकरणप्रकारकत्वोपस्थितौ
यत्रचेति यादृशाप्रामाण्याश्रयज्ञानइत्यर्थः तत्राह कांतमिति यद्यपिसप्रकारकंसविशेष्यकं
ज्ञानमित्या दिग्रन्थेन प्रामाण्याग्रहाद्याघवारणाय विवक्षणीयतदर्थमेतत्राप्युपादेयत्वमेव॰त
थापियत्रतादृशशब्दस्याप्यनवतारस्तत्रापिनोपादेयं यथाश्रुताभिप्रायेणैवेदंबोध्यं एतदस्वारसेनर
वावदंतीति । इदंघटत्वप्रकारकमिति इदंत्वसप्रकारकसविशेष्यकज्ञानग्राहकसामग्रीविवक्षणे
पिननिस्तारइतिसूचितं । विशेष्ये । व्यवसायविशेष्यावच्छेदे तत्प्रकारकेति व्यवसायप्रकारकेत्यर्थः । प्रकार२४
ननुपुरोवर्त्तिविशेष्यकत्वावच्छिन्नघटत्वप्रकारकताग्राहकेणापिप्रामाण्याग्रहाद्याघोऽतस्तत्रेष्टा
पत्तिमाह पुरोवर्त्तिनीति तदेवविवृणोतितत्रेति तत्रपुरोवृत्तिनितस्यघटत्वस्य॰ तत्रभासमानमि ण्म०
ति भासमानंपदंद्वेष्ठिध्यंतत्प्रतियोगित्वमर्थः । तत्र॰ तादृशावेष्ठिष्टप्रतियोगित्वंचातश्चपुरोवर् ७

न्निवृत्तिवैशिष्ट्यप्रतियोगित्वेन घटत्वस्य ग्रहे समानवित्तिवेद्यत्वविधया पुरोवर्त्तिनोपि घटत्वप्रतियो
गिकवैशिष्ट्यवत्त्वं भातमिति अतो घटत्वविशिष्टविशेष्यकत्वावच्छेदेन घटत्वप्रकारकत्वप्रामाण्यं गृ
हीतमिति भावः। भानेनैवेति। एवकारेण वैशिष्ट्यव्यवच्छेदः। तथा च तत्र भासमानतद्विशेष्यकत्वा
वच्छिन्नभानविषयीभूते वैशिष्ट्ये तत्प्रतियोगित्ववत्ताप्रकारकत्वग्रहेपि पुरोवर्त्तिनि वैशिष्ट्याग्रहा
न्न प्रामाण्यग्रह इति भावः। तदभावग्रह इति। यद्यपि तदभावो यदवच्छेदेन गृह्यते तदवच्छेदेन तद्व
त्ताग्रहं प्रत्येव तदभावग्रहो विरोधी समानप्रकारकत्वानुरोधात् तथापि रजतत्वाभाववान् रजतत्व
वानिति फलाभावात्तथाभूतस्यापि विरोधित्वं कल्प्यत इति भावः। तत्र च रजतत्वाभावप्रकारकज्ञान
स्य रजतत्वाभावावच्छिन्नधर्मिकरजतत्वप्रकारकज्ञानत्वेन प्रतिबध्यतावच्छेदकं अनाहार्यस्य ता
दृशज्ञानस्याप्रसिद्धेः आहार्यस्य च तस्याप्रतिबध्यत्वात्। किंतु रजतत्वप्रकारकज्ञानत्वमेव प्रति
बध्यतावच्छेदकं धर्मितावच्छेदकत्वेन विषयता च प्रतिबध्यतानियामकः संबंधः। प्रतिबंधकतानि
यामकश्च रजतत्वाभावप्रकारतासंबंधः। तेन संबंधेन प्रतिबंधकस्य रजतत्वाभावप्रकारकज्ञानस्य स
त्वात् न तदवच्छिन्नधर्मिकरजतत्वप्रकारकज्ञानमिति तदभावावच्छेदेन तद्वैशिष्ट्यग्रहायोगात्। प्रा ८

प्र·शि
८
8

मात्रस्य दुर्ग्रहत्वमुपपादयति एकधर्मितावच्छेदकावच्छेदेन तदभाववैशिष्ट्यस्य तद्वैशिष्ट्यस्य चैकदाधि
निश्चयासंभवात् संशयत्वस्यापि दुर्ग्रहत्वमुपपादयति एवमिति एकत्र· एकधर्मितावच्छेद
कावच्छिन्ने· अन्यथा पर्वतो वह्निमान् पाषाणमयो वह्न्यभाववान् इति ज्ञानस्य वस्तुगत्यैकधर्मिं
कविरुद्धोभयप्रकारकज्ञानत्वेन संशयत्वापत्तेरिति न त्वापेत इति एवोन्वयः। एकत्र विरु
द्धोभयवैशिष्ट्यघटितप्रकारत्वस्याग्रहादिति भावः। ननु रजतत्वाभाववति रजतत्ववैशिष्ट्यग्रहे
न किंचिद्बाधकं रजतत्वाज्ञानं प्रत्येव विरोधित्वात्। न च वैशिष्ट्यग्रहं प्रत्यपि असमानप्रकार
त्वात्। तथा चाप्रामाण्यं संशयत्वं च न दुर्ग्रहमतो वस्तुत इति यद्वा भासमानेत्यादिरूपं यत्प्रका
रत्वं तदभ्युपेत्य समाधाय वस्तुगतिमनुरुध्याह वस्तुत इति। स्वरूपसंबंधविशेषः अन्यथाभा
समानवैशिष्ट्यप्रतियोगित्वस्य तत्त्वे पिंडद्वौ पुरुष इत्यादौ पुरुषस्य प्रकारतापत्तेः भासमानवै
शिष्ट्यस्य संयोगरूपस्योभयप्रतियोगित्वात् न च दंड एव पुरुषं प्रति योगी पुरुषो दंडी इति ज्ञाने तत्र वैशिष्ट्य
पुरुषे प्रकारत्वस्य दंडे प्रकारत्वस्य चापत्तेः। न च वैशिष्ट्ये यत्प्रतियोगित्वं भासते तस्यैव प्रकारत्वं एम०
संबंधस्य विशिष्टप्रत्ययागोचरत्वात् तथा च पुरोवर्त्तिनि घटत्वप्रकारत्वग्रहे पि घटत्ववैशिष्ट्यस्य पु ८

भावज्ञान
प्रकारतत

विषयादिघटितज्ञानग्राहकत्वाभावादिति हेतुः ।

रोवँ संग्रहे प्रामाण्यग्रहाद्युपोद्घातरूद्धा इति भावः । ननु ज्ञानग्राहकसामग्रीपदेन विषयाविषयकज्ञान
ग्रहाजनकसामग्रीविवक्षणे घटादिप्रत्यक्षसामग्रीमादाय बाधवारणासंभव इत्यत आह ज्ञानग्राहके
ति घटादिप्रत्यक्षजनकसामग्र्यास्तु न घटज्ञानादिग्राहकताप्रयुक्तं विषयग्राहकत्वमिति न बाधः ज्ञान
ग्राहकत्वं तत्कल्लोपधानं तत्प्रयुक्तं न विषयग्रहोपधानं एकदैवोभयविषयकज्ञानोत्पत्तेरिति आशंक
ते यद्यपीति ज्ञानत्वावच्छिन्नकार्यतानिरूपितया दृशकारणतानिरूपकग्रहत्वव्यापकं विषयविषयि
त्वं तादृशकारणताप्रयोजकत्वेन सामग्रीविशेषणमपि पेतर्थः । ज्ञानसाक्षात्कारप्रतियाज्ञानत्वेन कारणा
तात्त्विन्निरूपकानुव्यवसायेविषयविषयितानियमादिति अनुव्यवसायपरिग्रह इति केचित्तन्नेकग्राह
कताप्रयुक्तमिति व्यापकत्वादिरूपप्रयुक्तत्वस्य घटज्ञानपदादिसाधारण्यात्तदवच्छेदकत्वरूपतद्वाच्यं तथा
च ज्ञानविषयग्राहकत्वयोः परस्परमवच्छेद्यावच्छेदकभावे विनिगमनाविरहात्तथात्वमिति घटज्ञान
पदेति यद्यप्यत्रापि ज्ञानग्राहकताप्रयोजकात्ममनोयोगादीनां विषयग्राहकताप्रयोजकत्वं संभवत्ये
व तथापि ज्ञानग्राहकत्वासाधारणप्रयोजकप्रयुक्तत्वं वाच्यं अनुव्यवसायस्थले त्वसाधारणप्रयो
जको व्यवसायएव विषयतया ज्ञानग्रहे ऽपनयतया विषयग्रहे तन्त्रमिति संग्रहः । प्रकृते त्वसाधारणं ज्ञान

॰कतया ज्ञातृत्वपर्याय ज्ञानत्वरूपेण बोधे ज्ञानलक्षणैव तथा च ज्ञानग्राहकतापदं ज्ञानलक्षणाविषयकत्वे ज्ञानत्वावच्छे॰

प्र॰म॰ ग्राहकताप्रयोजकं ज्ञानपदमेव तच्च न विषयग्रहे तंत्रमिति तद्व्युदासः। प्रमापदेनेति इदं ज्ञानं प्रमासमर्थप्र
वृत्तिजनकत्वादित्यनुमाने ज्ञानग्रहे पक्षधर्मता विषयग्रहे च व्याप्तिः प्रयोजके ति तदादायन सिद्धसा
८ धनमिति भावः। यथार्थानुभवत्वं प्रमापदशक्यतावच्छेदकत्वं तत्रमिति कथं ज्ञानग्राहकताप्रयोजकप्र
युक्तविषयग्राहकत्वं लक्ष्यतावच्छेदकीभूत विषये लक्षणाभावादत आह तद्वतीति तत्प्रमापदं कथं त
र्हि यथार्थानुभवो मानमिति प्रवादइत्यत आह स्मृतिभेदेति पूर्वानुभवस्येत्यर्थः प्रमाव्यवहारौपयि
कमिति तथा च चत्वारि प्रमाणानीति परिभाषा रक्षार्थं तांत्रिकाणां यथार्थानुभवत्वरूपेण परिभाषा साध्वा
धुनिक संकेतत्वान्न शक्तिरिति भावः। भ्रमपदेनेति। भ्रमानुमितेस्तु पूर्वोक्तयुक्त्या ज्ञानग्राहकताप्रयोज
कप्रयुक्तविषयग्राहकत्वाभावादिति भावः। यत्र रजतत्वशुक्तित्वे रिमे ततइति ज्ञानं प्रमाभ्रमरूपमुत्पन्नं तद्विष
यकभ्रमपदजन्यज्ञानेन प्रामाण्यग्रहाद्याधइति भावः। यथाश्रुतिभ्रमपदस्य प्रामाण्याश्रयीभूतज्ञान
ग्राहकत्वाभावादसंगतेरिति ज्ञानग्राहकतेति गुरुमते ज्ञानग्रहप्रयोजिका ज्ञानसामान्यसामग्री वि
षय ग्राहिका सावलंघटत्वादेः सर्वज्ञानाविषयत्वात्। विषयत्वात्। विषयग्राहताप्रयोजकस्येति विष प्र॰म॰
येन्द्रियसन्निकर्षादेरित्यर्थः। सर्वस्यैवेति नतु सर्वज्ञानग्राहकस्य विषयग्राहकत्वं ज्ञानपदेन घटाग्रहा ८

णत्वेन ३

दिति भावः ननु घटमहं जानामीत्याकारकस्वप्रकाशस्थले ज्ञानग्राहकताप्रयोजको विषयेन्द्रियसन्निक
र्षादिरेव स एव विषयग्राहकताप्रयोजक इति किमसंगतं नच ज्ञानसामान्यसामग्र्याः ज्ञानग्राहकत्वे क
छेदकेनतु र्तव्ये तावद्विषयेन्द्रियसन्निकर्षादेरिति वाच्यं तथा सति सर्वज्ञानविषयतापत्तेः किंतु तत्तद्घटविषयकत ज्ञानानां सर्व
त्तज्ज्ञानसामग्रीणां तत्तद्घटविषयकस्वात्मकतत्तज्ज्ञानविशिष्टात्मप्रत्यक्षत्वं कार्यतावच्छेदकं अत एवाती
तानागतज्ञानानां न वर्तमानज्ञाने भानमित्यत आह· अस्तु वेति केचित्तु ज्ञानसामान्यसामग्रीत्वेन ज्ञा
नग्रहत्वावच्छिन्नं प्रति जनकता यत्र यज्ज्ञानसामग्रीजन्यता तत्र तज्ज्ञानस्य विषयतेत्येवंरूपकार्यकारणयोः
प्रत्यासत्तिरिति प्रसंगभंजिका तेन न वर्तमानज्ञानस्यातीतादिज्ञानविषयत्वं· इत्थं च विषयग्राहकतापा ज्ञा
नग्राहकताप्रयोजकाप्रयुक्तत्वेपि ज्ञानग्राहकतायां विषयग्राहकताप्रयोजकप्रयुक्तत्वादेकप्रयुक्तो
भयग्राहकतात्वं वाच्यमत आह अस्तु वेतीत्याहुः। मिश्रमतमिति भट्टमतेप्यापाततो व्याप्तिरेवोभयग्र
हप्रयोजिकेति वक्तुं शक्यते इति तन्नोक्तं अनतिप्रसक्तमिति ज्ञानग्रहप्रयोजकव्यवसायप्रयुक्तवि
षय ग्राहकत्वपक्षेपि संभवति तथापि घटज्ञानपदार्थघटितकायां सामग्र्यां योग्यता ज्ञानस्योभयग्रहप्रयो
जकत्वात्तदतिप्रसक्तमतो यत्सामग्र्या ज्ञानग्रहं प्रति येन येन रूपेण साधारण्यस्य प्रयोजकत्वं विषयग्रहे

तादृशापत्तात्पर्यमुक्तं ताद्रूप्यानां तेन तेन रूपेणोपलंभयत्यस्मत्प्रत्येव प्रयोजकत्वादिति भावः ॥ नचेति ॥ मत्पपिता तादृशविशिष्टज्ञानमितिं प्रतिग रूः ॥

ग्र॰ म॰ १० पितेन तेन तेन रूपेणातस्य प्रयोजकत्वं वाच्यं तथा चानुव्यवसायसामग्र्या ज्ञानग्रहे मनः संयुक्तसमवायस्य तत्त्वे

न ज्ञानस्य विषयत्वेन प्रयोजकत्वं नतु विषयग्रह इति तन्मतासंग्रह इति भावः यद्वि येन विनेति न्याया

त्संयुक्तसमवायादेर्विषयग्रहे प्रयोजकत्वं यदि ब्रूयात्तदाह किंचेति घटज्ञानवानिति तादृशतद्रू

10 पावच्छिन्न घटज्ञाननिरूपितव्याप्तिविशिष्टपरामर्शत्वेन हेतुतापत्त्यावश्यकत्वे व्यापकतावच्छेदक

त्वज्ञानत्वादिना हेतुत्वे मानाभावः । तदभ्युपेत्य प्रतिबंदिमुखेनाह प्रमायदेपीति तथा च त

दादायसिद्धसाधनवारणाय दत्तपावत्पदं व्यर्थमिति भावः । तदभ्युपेत्य प्रतिबंदिमुखेनाह प्रमा

शक्तीति शक्तेर्ज्ञानग्रहे तदवच्छेदकत्वस्य विषयग्रहे तत्त्वादिति भावः नतु शक्यत्वस्यापि शक्तिविष तावच्छेदक

यत्वेऽभयग्रहे शक्तेरेव प्रयोजकत्वं ऽपेयते नतु शक्यतावच्छेदकग्रहे तदवच्छेदकत्वस्यापि गौरवा

दित्यत आह अव्यापकस्येत्यादि शक्यतावच्छेदकत्वेनैवेति एवकारेणाशक्तिव्यवच्छेदः तथा च प्र

कारांतरेणातिप्रसंगभंगे तत्र शक्तिरेव नानुकल्प्यत इति भावः । सिद्धांतमनुसृत्याह शक्यतावच्छेदकइ

ति शक्तिसत्त्वेपीत्यपि कारेणात्र शक्तेर्वोधोपयोगित्वाभावे तत्र शक्तिकल्पनमेवानुचितमित्यस्वरस एम॰

सूचितः । तस्याः । शक्तेः । तद्बोधे । शक्यतावच्छेदकबोधे विना लक्षणामिति अयंभावः शक्तिग्रहे हि १०

सवंधग्रहविषयासंवंधिस्मारकः स्वपदवच्छेदेन संवंधिनिगृह्यते तत्प्रकारेण संवंधिनं स्मारयति
न च निर्विकल्पकोपस्थिते शक्तिग्रहः। तथा च गोत्वप्रकारेण संवंधिग्रह इति तत्प्रकारेणैव गोः स्मृति
रिति न तत्र शक्तेरुपयोगितेति। न च स्मात्पदादयमर्थो वोद्धव्य इतीश्वरेच्छा विशिष्य शक्तिः तस्या गो
त्वविषयतासत्वात् गोत्वे शक्तिरेव विनिगमनाविरहयुक्तेः। अतिरिक्तत्वेपि शक्तिज्ञानस्यैव गोत्वविः
शिष्टस्मृतित्वं जन्यतावच्छेदकमवश्यं वाच्यं तथा च ज्ञानग्राहकताप्रयोजकप्रयुक्तविषयग्राहकता
कत्वमस्तु तमेव प्रमापदे पीत्यत आह भट्टमत इति यद्वा पदाद्विशिष्टज्ञानान्यथानुपपत्त्या वाधकं
विना विशिष्ट एव शक्तिरूपे पते शक्यसंयोगादिरूपलक्षणापास्तीरत्वे वाधावगत्या तत्र लक्ष्यताव
च्छेदकत्वमेव भाननियामकमन्यत्तु विशेषणांशे शक्तेरेतेवौधकत्वेन किंचिद्बाधकमिति सिद्धां
तिमतेनेदं हूषणमत आह भट्टमत इति असंभवात् ज्ञानग्राहकताप्रयोजकप्रयुक्तविषयग्राहक
ताया असंभवात् तदेवाह ज्ञाततेति ज्ञाततालिंगकत्वमिति ज्ञाततालिंगं लिंगविधयाघटकं यस्यां
सामग्र्यां तत्वमित्यर्थः। तेनानुमितिनिष्ठधर्मपरत्वेऽनुमितिप्रयोजकत्वानुपपत्तिरनुमितिसामग्र्या
इत्याद्युपदर्शितदोषानुपपत्तिश्च न भवतीति मंतव्यं। प्रयोजकं ज्ञानविषयग्रहयोरितिशेषः। अभि

प्र·म· चारोऽतीति ज्ञाततालिंगं विनापि घटेच्छादिरूपलिंगेनापि ज्ञानविषयग्राहसंभवादिति व्यतिरेकव्य
११ भिचारइत्यर्थः ॥ ननु ज्ञानानुमितिसामान्ये ज्ञाततायाव्यभिचारेपि ज्ञाततालिंगकानुमितौ न व्य
॥ भिचारइत्यतआह ज्ञाततामात्रेणेति तथा च तस्य ज्ञानग्राहकतावच्छेदकत्वसंभवेपि न विषयग्रा
हकतावच्छेदकत्वमिति भावः ॥ मात्रपदेन विषयव्यवच्छेदः ॥ ननु ज्ञाततारूपलिंगस्यापि स्वभावोय
ज्ञानं विषय[illegible] नियंत्रितमेव गमयतीति तत्र व्यभिचारइत्यतआह विशेषस्येति तथा च स्वभावेति विषय
नियंत्रितज्ञानग्राहकतायां स्वभावइत्यर्थः केचित्तु ज्ञाततामात्रेण ज्ञानमात्रानुमानसंभवात् विशे
षस्य ज्ञाततारूपस्य स्वभावकल्पनायां मानाभावाच्चेत्येकं ग्रंथं कृत्वा व्याचख्युः । वस्तुतस्तु ज्ञाततामा कुः
त्रेण ज्ञानमात्रानुमानसंभवेपि स्ववृत्तिवर्त्तमानज्ञानजनितज्ञाततविशेषस्य तथा स्वभावोभविष्य
विशेषस्येति· तीत्यतआह ज्ञाततविशेषत्वेनेति तथा च समिच्छाघटज्ञानजन्याइत्यनुमितावपि व्यापकताव तावच्छेदक
च्छेदकत्वं घटज्ञानयोर्ग्रहे तत्र मितितया प्रामाण्याग्रहाद्बाधः ॥ यदि च तत्र ज्ञानस्य ग्रहे व्यापकत्वं घट
स्य ग्रहे तदवच्छेदकत्वं तत्र मितित्वेनैकमुभयग्रहे तत्र मितिर्वाच्यो निरस्यते । तदा ज्ञाततविशेषत्वेन ज्ञान एम०
विशेषजन्यत्वानुमानेपि नैकमुभयग्रहप्रयोजकमिति भट्टमतापरिग्रहः ननु भवतोऽनुव्यवसायेय ११

थाद्यघटविशेष्यकत्वादिकमनुपस्थितमेव प्रकारीभूय भासते तथा भट्टमते स्ववृत्तिवर्त्तमानज्ञान
जनितज्ञाततालिंगकानुमितावपि तदनुमितिरनुभवसाध्यतुल्यत्वात् । तथाच ज्ञाततामात्रेण
ज्ञान ज्ञानमात्रानुमानसंभवेपि स्ववृत्तिवर्त्तमानज्ञानजनितज्ञाततालिंगकानुमितौ तथा नियमो न भविष्यती
ति तादृशज्ञाततात्वविशेषेण ज्ञानमात्रानुमानमसिद्धमेवेति तादृशज्ञाततालिंगकसामग्रीत्वमेवोभ
पूर्वेति ज्ञा दि यग्रहप्रयोजकं भविष्यतीत्यत आह तदादिपदेनेत्यत्र दादिपरिग्रहः । प्रकरणवशात् घटज्ञानो
पस्थापकेनेत्यन्वयः । ननु तदादिपदस्य प्राचां मते बुद्धिस्थत्वेन बोधकत्वान्न विषयोपरक्तज्ञान-
ग्राहकत्वमत आह यदात्तेरणलक्षणया वेति ननु घटज्ञाने लक्षणायां घटस्य लक्ष्यतावच्छेदक
तयाभानेन तु लक्षणया लक्ष्यतावच्छेदके लक्षणाभावादत आह आधुनिकेति । आधुनिकस्येच्छा
दिरूपस्य विषयतासंबंधेनोभयत्र सत्वात् तद्वत्त्वादेव ज्ञानविषययोः उपस्थितिरिति भावः । यत्तु भो
गपदस्य सुखदुःखसाक्षात्कारवाचितया तदाद्यये वसुखत्ववति सुखत्वप्रकारकत्वादौ वा वृत्ति
का तन्न ज्ञानत्वरूपेण ज्ञानग्राहकताविवक्षणेनापि तन्निरासात् । भोगपदस्य साक्षात्कारत्वेन ज्ञानग्रा
हकतया ज्ञानत्वरूपेण तदुपस्थापकत्वाभावात् एतेन विषयग्राहकत्वाव्याप्तज्ञानग्राहकताक

तदादिपदात्प्रामाण्याग्रहेण। तज्ज्ञानेति घटज्ञानं प्रमेयं पटज्ञानं च प्रमेत्याकारकसमूहालंबनयटज्ञा = संसर्गस्य सत्वं
नप्रामाण्यग्राहकेण शब्दादिनाघटज्ञानप्रामाण्यग्रहादवधारणापि घटज्ञानप्रामाण्यग्राहकत्वे
नभट्टाभ्युपगतत्वात्तद्व्युदासः। भट्टमतसिद्धमिति गुरुमतसिद्धभिन्नत्वे मिश्रमतसि द्धभिन्नत्वे
चाकृते घटज्ञानजन्यज्ञाततावान् घट इत्याकारकघटज्ञानोपनीतभानात्मकज्ञातता लौकिकप्रत्य
क्षसामग्र्या गुरुमिश्राभ्यामनभ्युपगततया भट्टमते घटज्ञानादिग्राहिकयाऽप्रामाण्याग्रहादव कथा
इतितन्नोक्तं वस्तुतस्तु पदार्जन्यपदार्थज्ञानकारणतावादिभट्टमते यदाभावेपि घटज्ञानास्ति
त्वादीनां प्रकारांतरेणोपस्थितो यथ्यतः श्वेतमारूप इत्यादिन्याये न घटज्ञानमस्तीति गुरुमिश्रा
नभ्युपगतोभवत्यन्वयबोधः तथाचतादृशगुर्वादिमतसिद्धभिन्नत्वेकृते तत्सामग्रीमादाय भट्टम
ते बाध इतितन्नोक्तं अयं घट इत्यादीति साम ग्याश्चक्षुर्घटसंनिकर्षादेरित्यर्थः। विशिष्टव्यतिरे
कस्येति तस्य भट्टेन ज्ञानग्राहकतानभ्युपगमात् विशिष्टव्यतिरेक इति भावः। यद्यपि घटज्ञान
वान् घटे छावत्वादित्यनुमानं ज्ञानग्राहकत्वेन प्रामाण्यग्राहकत्वेन भट्टमतसिद्धं गुरुमते तस्या प्राम॰
पि प्रामाण्यग्राहकत्वान्न तेत्साधारणं तथाप्ययं घट इत्यादिज्ञानजनकसामग्रीसाधारण्येनैव तन्म १२

।गं६ शसामग्रीवाप यस्य तस्वंग रुहतेनास्ति प्रेरित्यर्थः —

मिश्रमते तादृशसामग्र्याप्रामाण्याग्रहे विबाध इत्यर्थः ७५

तस्याप्रामाण्यं न हि यावती सामग्री प्रामाण्य ग्राहिका तावत्या माद्यायैव विप्रतिपत्तिरिति नियमो मानाभा
वादिति भावः यज्ज्ञानं भट्टेनाभ्युपेतं तत्सामग्र्यपि तज्ज्ञानसामग्रीत्वेन भट्टाभ्युपगतैव यच्च ज्ञानं भट्टान
भ्युपगतं तत्सामग्र्यपि भट्टानभ्युपगता तेन ज्ञानविषयो घट इति ज्ञानविषयकोपनीतभानात्म
कप्रत्यक्षजनकसामग्र्या घटत्वनिष्ठसंयुक्तसमवायात्मककारणघटिताया भट्टेन समवायानंगीकर्त्रा
ऽनभ्युपगमेपि न क्षतिः ज्ञानविषयो घट इति प्रत्यक्षस्य भट्टाभ्युपगतत्वेन तत्सामग्रीत्वेन तत्सामग्रीभ
ट्टाभ्युपगतैव ज्ञानीयत्वौ किं कप्रत्यक्षस्य भट्टानभ्युपगतत्वेन तत्सामग्र्या अपि तथात्वेन तदनभ्युपगतत्व
त्वात्तन्मिश्रमतासंग्रह इति ज्ञातताप्रत्यक्षेतितस्याः प्रामाण्यग्राहकत्वेन भट्टाभ्युपगमेपि तज्ज्ञानग्राह
कत्वाभावेन विशिष्टव्यतिरेकसत्वादिति भावः ननु घटसामग्र्या अपि तथात्वात्तद्वारणाय तदिति कथं
नोक्तमिति चेन्न यावत्वस्य ग्रहविशेषणत्वेन तज्जन्यग्रहाप्रसिद्धेरेव तद्दोषाभावादिति नंव घटज्ञानप्रा
माण्याग्राहकत्वे न ज्ञानग्राहकत्वेन भट्टमतसिद्धं यत्तदन्यत्वस्य पटीयस्त्वप्रकाशसामग्र्यां घटज्ञानानुव्य
वसायसामग्र्यां च सत्वात्तेन घटज्ञानादिप्रामाण्याग्रहान्मिश्रमते बाध इति ज्ञानग्राहके यत्र ज्ञानप
दस्य तत्प्रामाण्याश्रयीभूतज्ञानपरत्वाव्यकत्वे तत्रैव व्याहतिसत्वात् ज्ञाततापर्यंतानुधावनमफ

सामग्र्यांविशे

४ तादृशशाब्दानुव्यवसायसामग्र्या घटत्ववत्प्रकारकविशेष्यतयांशे प्रामाण्यग्राहकत्वं न स्यं भवतीत्यभिप्रायः ॥

प्र·भ· १२ 13

६ प्रामाण्यग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धप्रामाण्यग्राहकतद्भिन्नत्वे सतीति तज्ज्ञानग्राहकविषयकानुग्रहजनकमित्याव ६
लमिति वाच्यं तत्र प्रामाण्यघटकतत्प्रकारकत्वांशप्रत्यक्षमेवोपादीयतां किं ज्ञानपर्यंतानुधावनेनेत्याक्षेपे
ज्ञातताप्रत्यक्षमादायैव बाधसंभवात् गुरुमतसिद्धभिन्नत्वस्य निवेशो च घटज्ञानजन्यज्ञातता वान् २
घट इति ज्ञानोपनीतभानात्मकज्ञातताप्रत्यक्षमादाय भट्टमते बाध इत्येतत्स्वरूपं च ज्ञानार्थं च। अतएव दृशी
प्याग्राहकत्वमपि नोक्तमिति। न चैवं घटज्ञानमिति शाब्दबोधानुव्यवसायसामग्र्यास्तादृशभट्टमतसि साय
द्धभिन्नायाः शाब्दबोधविषयीभूतघटज्ञातग्राहकत्वात्तया च घटज्ञानप्रामाण्यग्रहात्मिश्रमते बा
धः एवं पूर्वमप्रामाण्योपनीतभानात्मकानुव्यवसायसामग्र्या अपि प्रामाण्यग्राहकत्वेन ग्राहकत्वे
न च भट्टमतसिद्धपतद्भिन्नत्वात् तया च घटज्ञानप्रामाण्यग्रहाद्बाधः अत्रोच्यते तज्ज्ञानप्रामाण्येति सामग्री
तद्ग्राह्यत्वमित्यर्थः घटज्ञानमित्यादिशाब्दबोधानुव्यवसायसामग्र्यास्तु भट्टमतसिद्धतादृशसामग्रीजन्य
शाब्दबोधविषयकानुव्यवसायात्मकग्रहजनकत्वेन तद्भिन्नत्वाभावान्न तमादाय बाधः। न च त्वापनये
घटज्ञानानुव्यवसायस्याऽपि ज्ञानत्वादिसामान्यलक्षणया तादृशशाब्दबोधादिविषयकत्वात्तज्जनक
सामग्र्यास्तद्विशेषणेनैव वारणे प्रामाण्यानुमितिसामग्रीमात्रस्य तादृशविशेषणद्वयेन संग्रहीतत्वात् राम०
तद्ग्राह्यत्वाभावरूपनिवेशसाधने [illegible] बाध इति वाच्यं व्यवसायोत्तरप्राथमिकज्ञानस्य ज्ञानत्वांशेऽपि १२

एतत्सन्नौका मामा

कल्पकस्य सामान्यलक्षणाद्यज्ञत्वेन तत्सामग्र्या अपि तादृशविशेषणाद्ययोपगृहीतया वदं तर्गा तत्तया
तद्ग्राह्यत्वाभावेनैव निषेधसाधनेऽबाधात् तद्ग्राह्यताया एव परैरंगीकृतत्वेन तन्निषेधे सिद्धसाधनावका
शात् । अत एव व्यवसायानंतरोत्पन्नज्ञानमेव मिश्राणां प्रामाण्यग्राहकमिति वक्ष्यति अप्रामाण्योपनी
तभानात्मकसामग्र्यास्तु वा पग्रहाभावेनैवाप्रामाण्यग्रहाभावेनापि तादृशग्रहे विशेषणोतन्निरासरू
तिसारं यद्वा व्यवसायप्रकारावच्छिन्नविशेष्यताकत्वमेवानुव्यवसाये भासते । इदं रजतमिति व्यवसायेऽज
तत्वाभाववद्विशेष्यकरजतत्वप्रकारकत्वेन तदनुव्यवसायोऽसंभावित एव नेच घटज्ञानस्य स्वसमान
कालीनत्वादिनासंबंधेन पटज्ञानानुव्यवसायेपत्रोपनयवशाद्ज्ञानं तत्र तादृशघटज्ञानोपनीतभाना
त्मकपटज्ञानानुव्यवसायसामग्र्या अपि तादृशत्वेन भट्टमतसिद्धभिन्नत्वात् घटज्ञानप्रामाण्यस्य च तद
ग्राह्यत्वान्मिश्रमते बाध इति वाच्यं उपनायकधर्मदर्शनादिसहकारिविरहेण तदानीं तादृशोपनी
तभानाभावात् तदपेक्षायां च व्यवसायस्य प्रापश्णोनाशेनानुव्यवसायासंभवात् यदि चानागतव्यव
सायेऽउपनायकधर्मदर्शनादिवशात्तादृशोपनीतभानात्मकानुव्यवसायसंभवस्तदा तादृशोपनीतभा
नत्वेन तादृशानुव्यवसायस्यापि भट्टाभ्युपगतत्वात् तत्सामग्र्या च तत्प्रामाण्यग्राहकत्वेन ज्ञानग्राहक

प्र॰ भ॰ त्वेन भदाभ्युपगतैवेति न तमादाय बाधः स्वसमानविषयत्वप्रत्यासत्त्या ज्ञानविषयकज्ञानजन्यं प
१४ त्तदन्यत्वेन तादृशाग्रहविशेषणात्तन्न तादृशोपनीतभानमादाय दोषः कस्यापि कश्चित् वस्तुतस्तु सर्सं
वैषयिकपदार्थसाक्षात्कारस्य संबंधितावच्छेदकरूपेण संबंधिविषयत्वनियमात् प्रत्यभिज्ञायां तत्ताविशि
15 म ष्टेदंताविशिष्टयोरभेदानुवाद्ये ज्ञानसंयोगादेरभावस्य च साक्षात्कार एवंपरं विषयसंबंधिप्रतियोगि
नां प्रत्यभिज्ञायां च तत्ताभाः ऽपनमवश्यं ज्ञानं इदं रजतमिति भ्रमस्थले तु स्वसन्निकृष्टस्य रजतस्य दोषा त्र
एवं विषयबाधभ्रमकालीनानुव्यवसाय ज्ञानं न तदुपनमवाश्यादिति तेषां राद्धांतः। अतो न्यत्रोप
नीतभानस्यैतैरंगीकारात् न घटज्ञानाद्युपनीतभानमादाय कोपि दोषः। अत एव विषयबाधभ्रमकाली
नानुव्यवसायमादाय बाधो दीधितिकृतोक्तो न त्वप्रमात्वानुव्यवसायमादायेति दिक् परे तु ज्ञानविषयक
ज्ञानजन्यमदनुमितिभिन्नं तदन्यत्वेन तादृशाग्रहविशेषणात्तादृशशाब्दबोधमादाय बाधः। ज्ञातता
लिंगकानुमितेर्ज्ञानविषयकज्ञानजन्यत्वाद्दमतसंग्रहाय भिन्नांतं अच घटज्ञानमिति शाब्दबोधस्ये
तद्विशेषणेनैव वारणे घटज्ञानवान् घटे घटवत्वादित्यनुमानवारणाय तज्ज्ञानप्रामाण्यग्राहकत्वेनेत्या रा॰म॰
दिविवक्षितत्वात् बाधभ्रमेति प्रमारूपबाधे क्षीकृतप्रामाण्याश्रयज्ञानग्राहकत्वमेव न संभवतीति १४

भ्रमपर्य्यतानुसरणं रजते नेदं रजतमिति ज्ञानकाली नेदं रजततया ज्ञानाभीत्याद्यनुव्यवसायेन रजते
रजतत्वप्रकारक त्वरूपप्रामाण्याग्रहादिति गुरुमते तु नेदं रजतमिति ग्रहणस्मरणात्मकबाधोत्तरमा
विनइदं रजतमिति स्वप्रकाशस्यप्रामाण्यग्राहकत्वमस्त्येव। विशेष्यकत्वग्रहं प्रति बाधग्रहस्याविरोधि
त्वात्· रजतत्वे श्रिष्यावगाहित्वस्य च भित्ते द्विपजन्यत्वादिनाऽवश्याभ्युपेयत्वात्· तदभावे प्रामाण्या
अप्रज्ञानग्राहकत्वस्याभावादेव बाधाभावात्तन्नोक्तमिति तदापि। बाधभ्रमकालेपि। तद्ग्रहः। प्रामाण्य
प्रति ग्रहः· नेदं रजतमिति बाधस्य इदं रजतमिति ज्ञानं प्रतिबंधकतयाऽधिकरणतावच्छेदकाभिश्रितरजतत्व
वत् विशेष्यकत्वग्रहस्याप्रतिबंधकत्वादिति भावः रजते रजतभेदग्रहे केनापि प्रकारेण तत्र न रजतत्व
ग्रह इति समानविषयत्वेन विरोधित्ववादिनां मतेनाह बाधग्रहाभावेनेति विशेषणत्वाद्दृश्यसामग्र्या
स्तज्ज्ञान्यग्रहस्य चेति शेषः· तेन यत्र सामग्रीकाले तज्ज्ञान्यग्रहकाले [redacted] वा बाधग्रहस्तत्र
प्रामाण्यग्रहाभावेपि न क्षतिः· ननु बाधग्रहोपदि रजते नेदं रजतमिति ग्रहस्तदा गुरुमतेऽप्रसिद्धिः
पथगृहीतासंसर्गकरजतभेदस्मृतिस्तदामिश्रादिमतासंग्रहः। एवं यत्र बाधग्रह एव न जातः तत्काले
ऽनुव्यवसायो वा तदा तद्विशेषणमनुचितमित्यत आह रीतिरिति ऽस्त्वेवेति अप्रामाण्याग्राहकेत्य

प्र·म·
१५ क
15
त्रेव[blot]वाधव्यवहारजनकत्वेन रूपेण वाधग्रहरूपादेयः यत्र चानुव्यवसायकाले तद्ग्रहो न जातः तत्र
तद्विशेषणांशे देयमिति भावः। ओदनकामेन कर्त्तव्यः पाक इत्यादौ ओदनसाधनत्वस्यैव योग्यतावच्छे
दकतया ओदनसाधनं पाकम् ओदनकामः कर्त्तव्य इत्याकारको बोधः। तस्य गुरुनये स्वप्रकाशतया
ओदनसाधनत्ववतीत्यादिप्रामाण्यग्रहानुरोधान्न बाधस्य संभव इति बोधपर्यन्तानुधावनं यद्यप्यो
दनसाधनत्वप्रकारकज्ञानज्ञाने ओदनसाधनत्वेनौदनसाधनस्यापि विषयत्वे गुरुनये स्वप्रकार
शतया ओदनसाधनत्ववतीत्यस्य ग्रहसंभवेन बाधासंभवः। तथापि साधनत्वमखंडमेवेति तत्प्रकारका
त्वेन ज्ञानस्याभा[blot]नेपि न साधनत्वेन रूपेण साधनस्य ज्ञानमित्याशयेनेदमिति कश्चित्। वस्तुतस्तु तद्वन्मुख्य
विशेष्यकत्वे सति तत्प्रकारकत्वमेव प्रामाण्यं ग्राह्यं तच्चाश्रय[blot]ग्राह्यत्वेन गुरुभिरभ्युपगतं ओदनसाधन
त्वप्रकारकज्ञानस्य योग्यतावच्छेदकस्याभाने ओदनसाधनस्य मुख्यविशेष्यतया न भानमिति तादृशशा
ब्दबोधस्य निरुक्तप्रामाण्याश्रयत्वाभावात् न गुरुमते तत्प्रामाण्यग्रहः। अत एव घटज्ञानमिति शाब्दबो
धेनापि घटत्ववतीत्यादेरविषयीकरणात्। मतत्रयेपि बाध इति विवक्षान्तरानुसरणं सर्वतान्त्रिकानु एम०
मतं अन्यथा तस्यापि विशेषणांशे घटत्ववतीत्यादिप्रामाण्याश्रयत्वेन स्वप्रकाशतया च तद्ग्रहकत्वेन १५

वाधासंभवात्। अत एव नीलं दधि पुरुषस्त्वत्र नीलं दधि ततया पुरुषं ज्ञानामीत्येव स्वप्रकाशकारः।
शब्दादनुपस्थितस्येति भट्टमतसिद्धभिन्नत्वरक्षार्थे। प्रामाण्याग्रहादोदनत्ववतीत्यादिप्रामाण्याग्रहा
त्। अनभ्युपगमादिति तथा च तादृशत्वेन भट्टमताभ्युपगतं पत्ततद्भिन्नत्वमस्त्येवेति भावः। भट्टेन शब्दा
दनुपस्थितस्येत्यनेन भट्टमते साधनताज्ञानाग्राहकत्वं तत्स्य लभ्यते अत एव न तत्ज्ञानग्राहकत्वम् अनए
वतादृशभट्टमतसिद्धभिन्नत्वमित्याशयं फर्वे यक्षपितुर्मञ्चानोदर्शयति तदग्रहे पीति ओदनसाधन। इत्यपि सम्भवमितिशेषः
त्वज्ञानाग्रहेपीत्यर्थः। न ज्ञानाग्राहकत्वमिति तादृशशब्दस्येति शेषः। तथा चोदनकामकर्त्तव्यताकबोधा
त्मकज्ञानग्राहकत्वाच्च न तादृशभिन्नत्वमिति न बाधः। एवं पक्षी आशयं प्रकाशयति शब्दाजन्येति का
म्यसाधनताज्ञानेति। काम्यसाधनताज्ञानज्ञानेत्येव पाठः। काम्यसाधनताज्ञानेति पाठे काम्यसाधनता
ज्ञानज्ञानेपि तत्सत्वात्तथोक्तं। भट्टमतेपि शाब्दबोधस्यान्वयितावच्छेदकविषमत्वनैयत्येन पदजन्य
व स्यान्वयितावच्छेदकज्ञानस्य शाब्दबोधजननकतया पदाजन्यतज्ञानस्य शाब्दसामग्र्यामप्रवेशानभ्युप
गमात् इत्यर्थः। तथा च भट्टमतसिद्धभिन्नत्वं तादृशसामग्र्यामक्षतमेवेति तत्प्रामाण्यासहात् बाध इति
भावः। सा च योग्यता च तेषां गुरूणां भट्टानां च तदनुप्रवेशः। योग्यतावच्छेदकविषयत्वं। तथा च पदाज
न्यान्वयितावच्छेदकज्ञानघटितशाब्दसामग्र्या अपि प्रामाण्याग्राहकत्वेन ओदनकामकर्त्तव्यताबोधरूप

प्र॰म॰टी॰ ज्ञानग्राहकत्वेन च भट्टमतसिद्धत्वात् तद्भिन्नत्वाभावादोदनसाधनता ज्ञानग्राहकत्वाभावाच्च न गुरुमते
१६ बाध इति भावः। पदादुपस्थितस्यैकविशेषबाधे विशेषान्तररूपस्य वा योग्यतावच्छेदकस्यापि शाब्दा
नुप्रवेशादाह नियत इति ननु एवं स्वर्गकामकर्तव्यताबोधविषयत्वरूपनियोज्यत्वान्वयबोधे स्वर्ग
16 साधनताज्ञानरूपयोग्यतावच्छेदकानुप्रवेशोपि नियतस्तत्कथमेतन्न भवेदत आह नियोज्येति ननु घटे
न जलमाहरेत्यादौ छिद्रेतरत्वप्रकारकत्वेन कथमन्वयानुभव इत्यत आह क्वचिदिति एकविशेषेऽ
ति एकविशेषस्य। छिद्रेतरघटभिन्नस्य बाधे जलाहरणकारणतायां बाधनिश्चये शाब्दसामग्र्या। घ
टशाब्दसामग्र्याः विशेषान्तरेति छिद्रेतरघटत्वप्रकारकेत्यर्थः। न चैवं यत्रैकविशेषबाधादोदनसा
धनताज्ञानविषयपाकान्वयबोधस्तत्र तादृशसामग्र्या भट्टेनानभ्युपगमात् बाध इति वाच्यं एकविशेष
बाधेऽपरविशेषबोधजनने शाब्दसामग्रीत्वाभाव्यवलेन शाब्दानुपस्थितस्याप्यर्थस्य भट्टेनापि शाब्दबो
धप्रवेशाभ्युपगमात् इति योग्यताज्ञानविषयैव शब्दाजन्या ओदनसाधनताज्ञानघटितायाः शाब्दसा
मग्र्या अभ्युपगमाद्वा। स्वर्गकामेति। कार्यविशेष्यकप्रथमान्वयबोधस्यैवाकारोयं अनभ्युपगमा[त्]
दिति तन्मते शाब्द भावनाया एव लिङर्थत्वेन नियोज्यान्वयबोधस्याप्येवं वाच्यत्वस्य चेतेनानभ्युपग प्रम॰
मादिति तदुक्तं अभिधांभावनामाहुरन्यामेव लिङादयः अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचर इति। त १६

तथा च तादृशत्वेन भट्टमतसिद्धभिन्नत्वं वर्त्तत एव तादृशसामग्र्या इति बाध इति भावः ननु घटेन ज्ञातमा
हरेत्यादौ ज्ञानविषयत्वरूपेण घटे तात्पर्यसत्त्वे पदजन्यतदुपस्थितिं विना ज्ञानविषयेण घटेन ज्ञातमाह
रेति शाब्दबोधो भवति तत्र योग्यतावच्छेदकविधयापि ज्ञानविषयत्वभानं शाब्दबोधकारणत्वेन न भट्टैर
भ्युपेयं । छिद्रेतरत्वस्यैव योग्यतावच्छेदकत्वात् तथा च ज्ञानग्राहकत्वेन प्रामाण्यग्राहकत्वेन च भट्टमतसि
द्धत्वं तादृशसामग्र्यां न वर्त्तत एव । तथा च प्रामाण्य ग्रहाद्बाधः । एवं यत्रास्तीति शब्दश्रवणे घटज्ञानरूपा
र्थाध्याहारवत्त्वात् घटज्ञानमस्तीति शाब्दधीस्तत्रापि बाध एवेति चेन्न तज्ज्ञानप्रामाण्यग्राहकत्वेन ज्ञा
नग्राहकत्वेन भट्टमतसिद्धत्वस्य तदुभयरूपेण भट्टमतप्रमितार्थकत्वात् उपदर्शितोभयस्थले तथा॰ ना
विशेषशाब्दसामग्रीद्वयस्य भट्टानंगीकर्त्तव्येपि तज्ज्ञानप्रामाण्यादिघटितधर्मद्वयस्य ज्ञानस्य तत्र भट्टम
ते प्रमात्वेन तत्र तादृश भट्टमतप्रमितभिन्नत्वाभावात् एवं यागविषयकं कार्यमिति वेदजन्यज्ञानं गुणः
गुणत्वादित्यनुमानस्य भट्टमते प्रामाण्यग्राहकत्वेन ज्ञानग्राहकत्वेन च प्रमितत्वेन तद्भिन्नत्वाभावा
देव बाधाभावात् न हि तादृशानुमानं भट्टमते भ्रमरूपानुमितिजनकमिति तदनुमाने भ्रमरूपानु॰
मितिजनकत्वज्ञानमपि भ्रम इति न किंचिदेतत् तादृशोभयवत्त्वेन गुरुमतप्रमितभिन्नत्वेन तु सामग्री

भ.टी.
१७
17

नविशेषणीया ज्ञानजन्यज्ञातताप्रत्यक्षादिसामग्र्या गुरुमतेऽप्रसिद्धत्वेनतत्र तथाप्रमापाऽभावेन
तादृशप्रमितभिन्नत्वस्यसत्वात्. तादृशसामग्रीमादायभट्टमतेवाधवारणसंभवात्. भट्टमतासिद्ध.
भट्टानभ्युपगतज्ञानग्राहकतापक्षः शाब्दानुमितिस्मृतिसामग्र्यास्तद्भिन्नत्वेनचेत्यर्थः अत्रभट्टम
तसिद्धज्ञानग्राहकताकेत्युक्तेगुरुमिश्रमतासंग्रहः।व्यवसायानुव्यवसायजनकसामग्र्या भट्टैर्ज्ञानग्रा
हकत्वेनानभ्युपगमात्. अतोनजन्यगर्भता: तदर्थमेवशाब्दादिपदमपि, उभयत्रप्रत्यक्षसामग्र्याः
अपिभट्टमतासिद्धज्ञानग्राहकताकशाब्दादिसामग्रीभिन्नत्वेनतामादायगुरुमतसंग्रहः एवंपूर्वोक्ति
ज्ञानविषयेणघटेनजलमाहरेत्यादिशाब्दसामग्रीतादृशज्ञानग्राहकैवेतितामादायनवाधः। अत्रभ
ट्टमतासिद्धशाब्दादिसामग्रीभिन्नत्वोक्तौभट्टमतापरिग्रहः. भट्टमतासिद्धशाब्दसामग्र्याभट्टमतेऽ
प्रसिद्धत्वेनतद्भिन्नसामग्र्याअप्रसिद्धेः ~~भट्टमतासिद्धतत्तद्विषयग्राहकताकशाब्दादिस्मृतिसामग्री~~
~~प्रसिद्धत्वेनतद्भिन्नसामग्र्याअप्रसिद्धेः~~ भट्टमतासिद्धतत्तद्विषयग्राहकताकशाब्दादिस्मृतिसामग्री
भिन्नत्वोक्तौतुयत्रघटवद्भूतलमितिशाब्दबोधोत्तरकालीनघटज्ञानविषयत्वमन्वयितावच्छेदकंतत्र प्रम०
पदाजन्यतज्ञानसत्वेपिगुरुणातत्तद्विषयकशाब्दांशीकारात्तत्सामग्र्याघटरूपविषयग्राहकत्वेनभ १७

द्दमतासिद्धग्राह्यग्राहकताकशाब्दसामग्रीभिन्नत्वात् तथा च प्रामाण्यग्रहाद्रूपमते बाधः स्यादतो ज्ञा
नग्राहकताकेति अनुमितिस्मृत्योरुपादानं च यागादिविषयकं कार्यमिति वेदजन्यं ज्ञानं गुणादिति
अनुमितिसामग्री तन्मूलकस्मृतिसामग्र्या भट्टमते ज्ञानग्राहकत्वाभावमभ्युपगम्य तादृशानुमि
तिस्मृतिसामग्री ग्राह्यत्वाभावेन वा ध्रुवा रणाय । अत एवान्यथाख्यातिवादिनो भट्टस्य तादृशानुमि
तिस्मृतिसामग्र्या अपि ज्ञानग्राहकत्वाभ्युपगमात् तादृशभट्टमतसिद्धभिन्नत्वमस्तीति तेनाप्यवा
रणोक्ष्यर्थं तदुभयोपादानं इति दिदिति धामकाश्चिदित्यन्तेनास्वरसोद्भावितः अन्नतिप्रयोजकत
या ग्राहकत्वभागं दूरीकृत्य लघु साध्यमूलं यथा विरुद्धमेहेतत्प्रामाण्यविषयत्वेनेति प्रत्येकद्
त्वव्यावृत्तिः एवं च तत् विशिष्टेति बाधभ्रमकालीनानुव्यवसायवारणाय तादृशबाधाभावविशि
मू ष्ट इत्यर्थः अविशिष्टोवेति वाकारोवधिष्ठितविकल्पार्थः तथा च यत्र बाधभ्रमकालेऽनुव्यवसायो न
त जातः तत्रैव द्वित्रिक्षणानन्तरेयमिति भावः ननु नीलं सरोजं भवत्येवेत्यादौ क्रियासंगतत्वकारस्यान्व
यितावच्छेदकसामानाधिकरण्येनायोगव्यवच्छेदस्य बोधकत्वात् प्रकृते पि प्रामाण्यस्याश्रयग्राह
केणागस्वतरत्वेत्यत्र स्वाश्रयग्राहकत्वसामानाधिकरण्येन प्रामाण्यग्राहकत्वायोगव्यवच्छेदो लभ्यते त

म० टी०
१८
18

ध्याचमत्किंचित्स्वाश्रयग्राहकेण प्रामाण्यानुमित्यादौ प्रामाण्यग्राहकत्वस्यान्यापत्तये पिमावात् विषो
सिद्धसाधननिषेधेच बाधः। तथाचस्वाश्रयग्राहकेयावत्वस्यावश्यकत्वात् कथं तत्तस्त्वाभ इत्यत
आह यथाचेति। स्वाश्रयग्राहकेत्यादिग्रंथात् अयमर्थः। स्वाश्रयग्राहकयावदर्थगर्भोऽर्थः। एव
कार्थविवेचन इति। ग्रहणार्थकधातुसमभिव्याहृत एवकारस्य क्रियासंगतस्याप्यन्वयितावच्छेद
कावच्छेदेनबोधजनकत्वमनुभवबलादास्थीयते। ज्ञानं विषयं गृह्णात्येवेतिवत् ज्ञानं रजतं गृ
ह्णात्येवेत्यप्रयोगात्। नचतथापि प्रामाण्यत्वावच्छेदेन स्वाश्रयग्राहकग्राह्यत्वायोगव्यवच्छेदए
वप्राप्तो न तु स्वाश्रयग्राहकत्वावच्छेदेन प्रामाण्य ग्राहकत्वायोगव्यवच्छेदवत्वमिति वाच्यं तस्यो
गव्यवच्छेद एव प्राप्तौ न तु स्वाश्रयग्राहकत्वावच्छेदेन प्रामाण्यग्राहकत्वायोगव्यवच्छेदवत्वमि
ह ति वाच्यं तादृशायोगस्याप्रसिद्ध्या स्वाश्रयग्राहकत्वावच्छेदेनैव लक्षणायोपस्थितस्य प्रामाण्यग्राह
कान्यत्वस्यव्यवच्छेद्यत्वात्। तथाचप्रकृते स्वाश्रयग्राहकत्वावच्छेदेन प्रामाण्यग्राहकान्यत्व
स्यावच्छेदो लभ्यत इत्यर्थः। तत्र। स्वाश्रयग्राहकेत्यत्र मात्रपदं कृत्स्नार्थकं यावत्प्रामाण्यस्य विष स्म०
यत्वलाभायेत्यर्थः। उक्तक्रमेणैवकारसमभिव्याहारादेव सामञ्जस्ये स्वांतं त्रेण यावत्त्वविशेषण १८

३ अकारग्रहतः पाठः ही
धित्व कृत्स्नप्रतिपत्तमित्याधेण योग्यः

७ मनुचितमित्यत्राखरसः ।ननुं भमवादीत्यनेनयत्किंचिन्मीमांसकनैयायिकोपसंग्रहे गुरुमता
संग्रहः ।व्यवसायजनकसामग्र्याः प्रामाण्यग्राहकत्वस्य भट्टनैयायिकोभयसिद्धत्वात् मीमांस
कत्रयनैयायिकोपसंग्रहे च भट्टेन च समं विवादे भट्टनैयायिकोपग्रहे ग्रोवसामंजस्ये मिश्राद्युपा
न दौमनुचितं एवं मिश्रादिना विवादे भट्टाद्युपादानमपि । एवं ज्ञानविषयोघट इति ज्ञाद्वोधस्य
स्वप्रकाशतया गुरुनये घटत्ववतीत्यादि प्रामाण्यग्राहकस्य तादृशमीमांसकत्रयनैयायिकसि
द्धप्रामाण्यग्राहकभिन्नत्वात् भट्टमिश्रयोर्नयेतेनप्रामाण्यग्रहानमादायबाधः एवं घटज्ञानो
यनीतमानात्मकघटज्ञानात्तुव्यवसायसामग्र्या भट्टगुरुवेनभ्युपगतत्वेनतादृशत्वात्तत्पाचघटज्ञा
नप्रामाण्यग्रहान्मिश्रमतेवाधश्चातत्राह यद्वाययोरितितथाच भट्टेनैव समं विवादे भट्टनैया
यिकोभयं । एवं मिश्रादिवोध्यं तथाचव्यवसायानुव्यवसायज्ञाततालिंगकानुमितयः तदुभयसि
द्धप्रामाण्यग्राहकभिन्नाइतितन्मतसाधारण्यमितिभावः ।अत्रचगुरुणाविनादेव्यवसायजनक
सामग्र्याः प्रामाण्यग्राहकत्वेनैनैयायिकमतसिद्धत्वेपिगुरुमतसिद्धत्वाभावात् तदुभयत्वावमत
सिद्धभिन्नत्वमविकलंइतिनप्रतियोगिकोटौज्ञानग्राहकत्वप्रवेशः नैयायिकासिद्धेति नैयायि

ज्ञाततावाघट॰ [illegible] मते सिद्धत्वेऽपि नैयायिकाभिसिद्धत्वादित्यर्थः ॥१॥

[illegible]

भ॰टी॰ कासिद्धत्वेनैवोभयवादिसिद्धत्वाभावादित्यर्थः ज्ञातताघटितेत्युभयसिद्धतादृशाभिन्नत्वस्याति
१९ स्फुटत्वार्थं। तत्प्रत्यक्षेति। ज्ञातताप्रत्यक्षेत्यर्थः। यदा मिश्रेण गुरूणा वा विवादः तदा ज्ञानग्राहक
१। त्वेनोपादेयं। तज्ज्ञानग्राहकेति ज्ञाततालिंगकपरज्ञानानुमितिसामग्र्या घटज्ञानप्रामाण्यग्रहा
त्तद्घटप्रामाण्याश्रयज्ञानग्राहकत्वं अवश्यं वाच्यं इति विवक्षणीयतदर्थघटितं ऽप्यात्तं ज्ञानं द्व
यमिति ज्ञानग्राहकत्वलक्षणाय ज्ञानपर्यंतानुधावनं अन्यथाख्यातेरनभ्युपगमेन तत्सामग्र्याश्र
पि गुरूणाऽनभ्युपगमात्। सिद्धसाधनमिति इदं च गुरूणा विवादे। भट्टमिश्राभ्यां विवादे तु प्रामा
ण्यग्राहकत्वेन तादृशसामग्र्याः ऽभयवादिसिद्धत्वेनैवेति सिद्धसाधनाद्यप्रसक्तेः तयोरन्यथा
ख्यात्युपगमात्। व्यधिकरणप्रकारकेति व्यधिकरणप्रकारकत्वं तु गुरूणामेवप्रसिद्धमि
४ तिवेदं न्यं ज्ञानं गुणो ज्ञानत्वादित्यनुमानेनापि एवोक्तविवक्षया न दोष इति भावः। एवं ग्राहक
त्वभागमपास्य तत्प्रामाण्याविषयकत्वेन यदुभयवादिसिद्धं तद्भिन्नयावज्ज्ञानग्रहो दूषियोन
वेति एवं निष्कर्षार्थो वक्तव्य इति भावः। तच्चित्यमिति चिंताबीजं च प्रामाण्यग्राहकत्वेन यदाय एम॰
त्। मीमांसकेन विवादस्तन्मतसिद्धं यत्तद्भिन्नत्वेनैव साम्यं तस्येतऽभयवादीतिमर्थः। घटज्ञानविष १९
४ ति॰ दर्शने [illegible] वेति॰ वाधकालीनानुव्यवसायपवारणयवा धर्म्मग्रहाभावो विशेषणं ॥ प्राग्विषयकं त्वर्थमि ॥ ४

१०जन्यतयाप्रामाण्यानुमितेर्नतादृशमाध्य भवः।। भट्टमतेनुद्व्यंज्ञाततांघटविशेष्यकघटत्वप्रकारकज्ञान १०

योघटइतिव्यवसायसामग्र्यागुरुमतेप्रामाण्यग्राहकत्वात्प्रामाण्यग्राहकत्वेनोभयवादिसिद्ध
भिन्नतयामिश्रमतेभट्टमतेचतेनप्रामाण्यग्रहाद्बाधः प्रत्येकमतोपादानेतुनत्रितयमतसाधारण
णीविप्रतिपत्तिरिति।किंचघटइत्याकारकज्ञानविषयाइतिज्ञानसामग्र्याघटज्ञाततायाघटज्ञानप्रयो
ज्येतिज्ञानसामग्र्यास्तदुभयसिद्धप्रामाण्यग्राहकभिन्नायाः प्रामाण्यग्रहाद्बाधः इत्यादिकंमतव्यं
श्रीरामचंद्रायनमः श्रीः तज्ज्ञानेतियज्ज्ञानेप्रामाण्यग्रहस्तज्ज्ञानसमानाधिकरणत्वेनेत्यर्थः।तथा
चयाद्यप्रामाण्याश्रयीभूतज्ञानविषयकयत्तज्ज्ञानसमानाधिकरणज्ञानान्यतज्ज्ञानसमानाधिक
रणज्ञानग्राह्यत्वेनेत्यर्थः।याद्यप्रामाण्याश्रयीभूतज्ञानविषयकंतज्ज्ञानसमानाधिकरणंज्ञानंगुरु
मतेव्यवसायएवमिश्रमतेऽनुव्यवसायः भट्टमतेज्ञाततालिंगकानुमितिः तदन्यग्राह्यप्रामाण्य
ण्याश्रयज्ञानसमानाधिकरणस्तएवतद्ग्राह्यत्वात्त्रितयमतसंग्रहः।नैयायिकमतेज्ञानंप्रमेत्यनुमि ३
तौज्ञानस्यपक्षतयातज्ज्ञानविषयकसमानाधिकरणपरामर्शात्मकज्ञानंसाध्यतादृशज्ञाततात्वा
दिधर्मत्यत्रघटविशेष्यकघटत्वप्रकारकज्ञानत्वेनज्ञानांतरेव्यापकत्वंगृहीतं।पक्षधर्मतावलादप
वैज्ञानंभासते।समानप्रकारकत्वेनव्याप्तिज्ञानादीनांतन्मतेकार्यकारणभावादितिनतन्मतासंग्रहः।

तज्ज्ञानविषयकं तदेव तन्निष्ठज्ञानमपि तत्समानाधिकरणं तदेव तज्ज्ञानत्वविशिष्टं केवलान्वयितया समानाधिकरणं

भ॰टी॰ १० 20 नन्वीश्वरज्ञानस्यापि ग्राह्यप्रमा[illegible]स्याप्र पिततया समानाधिकरणं पददाने पि तथैव व्यतिरेकाप्रसिद्धिर
त आह ईश्वरेति तथा चास्मदादिवृत्तिज्ञानमेव त[illegible]ज्ञानत्वेनोपादाय तत्समानाधिकरणं तद्विशे
षणं देयं तत्राखंडाभावतया न वैयर्थ्यं परमते · नैयायिकमते त्वीश्वरज्ञानव्यावर्त्तकमेवा न तत्समा
नाधिकरणं । नग्राह्यप्रामाण्याश्रयज्ञानसमानाधिकरणं · नच जन्यत्वमेव विशेषणं । मीमांसक
मते व्यावृत्त्यसंभवात् · प्रकृते त्वखंडाभावत्वात् न दोष इति । नाप्रसिद्धिः प्रथमसमानाधिकरणप
दादाने तज्ज्ञानविषयकज्ञानाजन्यतज्ज्ञानसमानाधिकरणज्ञानाप्रसिद्धौ तद्वृत्यत्वाभावरूपनि
षेधाप्रसिद्धिः । चरमतत्पदादाने तु तज्ज्ञानसमानाधिकरणं तज्ज्ञानविषयकज्ञानाजन्यभावज्ञा
नपुरुषांतरीयज्ञानग्राह्यत्वस्य जगद्वृत्तितया व्यतिरेकाप्रसिद्धिरिति । यद्यपि चरमदले तत्पदादा
ने परकीयज्ञानग्राह्यत्वमादाय सिद्धसाधनमपि संभवति · तथापि उभयपदे तत्पदप्रयोजनमक्षि
द्धिवारणमेवेति तथाभिधानादिति । विधिकोटौ सिद्धसाधनं तु न संभवत्येव मीमांसकैरीश्वरानंगी
कारात् । कारणाभावप्रयुक्त इति प्रयुक्तत्वं तदन्वयव्यतिरेकानुविधायित्वा । समयसंबंधित्वं · विवे राम॰
चितचैतदश्वादालोकसारमंजर्यां । चिंतावीजं तु गुरुमतेऽधिकारणहृद्याभावस्य प्रकृते आत्मरूपस्य च १०

न निरुक्तान्वयव्यतिरेकानुविधायित्वमिति जत्रितयमतसाधारण्यमिति । यथार्थेति अयं यथार्थे
घटज्ञानवान् अयथार्थे घटे घटत्वाद्यथार्थसंस्कारवत्वाद्वा इत्यत्र पूर्वप्रतीतघटज्ञानादीनामयोग्या
हेतुकानुमितिविषयताया बाधकाभावात्पक्षधर्मतावत्वात् तत्कालावच्छिन्नात्मपक्षतायां प्र
पासगौरवं दा... पि घमाणमहं संग्राहकत्वात् तापक्षकानुमानतुल्यतापीत्यभिप्रेत्याह त
त्वादीति । इयमिश्चायथार्थघटज्ञानत्वाद्यघटे घटत्वात् । एवं संस्कारपक्षकानुमितावपि वोध्यं
अनुमितिमिनो सिद्धविशेष्यकत्वतत्त्वभ्रमस्याप्रसिद्धेरजतेतरजततत्त्वप्रकारकेच्छाजनकतायाः सीमासकाभ्यु अनुमितिमिनो
पगतत्वाद्व्यभिचार इत्यतः संस्कारेति यक्षधर्मतावत्वादिति सामान्यलक्षणाधीकारात् । अ
नुमितिविषयीभूतस्यप्रमात्वाश्रयीभूतज्ञानस्य जनकीभूतज्ञानागोचरत्वेन तादृशज्ञानग्राह्य
त्वस्य सत्वादितिभावः । एतच्च घटत्ववतिघटत्वप्रकारकत्वाश्रयव्यक्तीः प्रातिस्विकरूपेणोपा
दाय विप्रतिपत्तौ सिद्धसाधनं वोध्यं । यदि च ग्राह्यप्रामाण्याश्रयत्वेन तादृशज्ञानमादाय विप्र
तिपत्तिस्तदा घटत्ववति घटत्वप्रकारकत्वा अप्रज्ञानांतरविषयकस्यव्याप्तिज्ञानस्यजन्यतयानसि अनुमितेरितिशेषः ॥२
द्धसाधनमेत्याह । अयमेति ननु यत्र घटत्वभ्रमे घटत्ववति घटत्वप्रकारकत्वग्राहीत्वाद्घटप्रमायां

म.टी.
२१
(21)

प्रामाण्यग्रहः तत्र घटत्ववति घटत्वप्रकारकत्वाश्रयं ज्ञानान्तरजन्यत्वात् सिद्धसाधनमत आह तद्घट ज्ञानविषयक
कस्येति प्रामाण्यघटकस्येत्यर्थः तथा च घटत्ववन्मनस्य प्रामाण्यं घटत्वप्रकारकत्वाश्रयतया तद्विषय घटक.२
कज्ञानजन्यज्ञानग्राह्यत्वात् न सिद्धसाधनमिति भावः ननु घटत्वस्यापि प्रामाण्यघटत्वेन तदाश्रयघ क
ट विषयकज्ञानजन्यत्वादनुव्यवसायस्य सिद्धमतेवाध इत्यत आह तत्प्रकारकत्वेति आदिपदेन
विशेष्यत्वादेः परिग्रहः तथा च घट विशेष्यकत्वं घटत्वप्रकारकत्वं वा विशिष्योपादाय तदाश्रयवि
षयकज्ञानाजन्येति विवक्षितमतो न दोषः। अत्र यद्यपि घटो घटत्ववति घटत्वप्रकारकमिति प्र ३
मानं तं रं अनुमित्यादिना प्रामाण्यग्रहात् सिद्धसाधनतादवस्थ्यं। घटस्य प्रामाण्यघटकतत्प्रकारक
त्वादेरनाश्रयत्वात् तथापि तदाश्रयपदेन तत्प्रकारकज्ञानविषय एव विवक्षितः। तथा च घटत्वप्रका
रकत्वघटविशेष्यकत्वज्ञानविषयो घटः तद्विषयकज्ञानजन्यत्वात् न सिद्धसाधनमिति भावः। व
न स्तुतस्तु प्रामाण्यस्य तद्घटकीभूततत्प्रकारकत्वादेः भाने वश्यं तदाश्रयभानमिति नियमांगीकारेनैव
त तादृशविप्रतिपत्तिरुक्तेति न तं भ्रममूलकानुमित्यादिग्राह्यत्वमादाय सिद्धसाधनं ... त्वलाघवम णम०
ज्ञान भिप्रेत्यैव तद्घटकस्येत्युक्तं। तादृशनियमानभ्युपगमे तत्प्रकारकत्वविषयकज्ञानाजन्येत्याद्येव व २१

त्वप्रकारकज्ञानत्वादित्यत्र व्याप्तिज्ञाने घटत्वप्रकारकज्ञानस्य विषयत्वादिति भावः। ननु सामान्यतः ५८

क्यमतो न पदा कदाचित्तादृशज्ञानविषयत्वस्य केवलान्वयित्वाद्व्यावर्त्तकत्वं तत्कालीनतत्पुरु
षीयतादृशज्ञानत्वोक्तौ च तत्कालीनतत्पुरुषीयाघटेऽनंतप्रवेशगौरवमिति भट्टमतेतितन्मतेद्र
यं ज्ञाततायां घटत्ववति घटत्वप्रकारकज्ञानजन्याघटत्ववति घटज्ञानमेव यत्प्रकारकयद्विशेष्य
कज्ञाततात्प्रकारकतद्विशेष्यकज्ञानसाध्येति व्याप्तिग्रहसंभवेपि पक्षधर्मतावत्वात् घटज्ञा
नं प्रामाण्यं लाघवादिति न तन्मतासंग्रह इत्यत आह यत्तज्ज्ञामिति प्रकृते धीति तन्मतेपि पटज्ञाने ज्ञा
तो व्याप्तिग्रहसंभवेन सिद्धसाधनस्य वज्रलेपत्वादिति भावः वस्तुतो घटत्वत्वादिकमननुगतमेकं ना
स्तीति तन्मतासंग्रहः सिद्धसाधनं चेति बोध्यं सर्वज्ञा इति तथा च पक्ष एव न सिध्यतीति भावः। तद्वि
तादृशेति। आद्यप्रामाण्याश्रयविषयकसमानाधिकरणज्ञानजन्यत्वेन पूर्वं नैयायिकसिद्धत्वद्वि
न्नसमानाधिकरणात्वत्वम[illegible]र्थः। यथार्थत्वा लिंगकप्रामाण्यानुमितिर्नैयायिके सततदाश्रयप
विषयकज्ञानजन्यत्वेनैवाभ्युपगतात्तैर्विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य जनकत्वाभ्युपगमादि
ति न तया सिद्धसाधनमिति भावः। नैयायिकन्तपद इत्यादि। तथा च नभट्टमतासंग्रह इति भावः। न
न्वेवं नैयायिके इतरा निर्विकल्पकांगीकारात् तज्ज्ञानविषयकज्ञानजन्यत्वेनैव तेरनुव्यवसाय

भ॰टी॰ स्यांगीकारात् तन्मिश्रमते बाध इत्यत आह व्यवसायेति तथा च निर्विकल्पकस्थलीयमेव ज्ञानं तन्मते प्रा
